DMG

Eb
2367

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000001

5/–

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000002

5 sh

J. Gildemeister
Bonn 1863

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000003

1507
M214
T187

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000004

। महावीरचरितम् ।

॥ महाकवि श्रीभवभूतिप्रणीतम् ॥

गवर्णमेण्ट संस्कृतपाठशालाध्यापक

श्रीतारानाथ तर्कवाचस्पति

संस्कृतम् ॥

॥ विश्वप्रकाशयन्त्रे मुद्रितम् ॥

संवत् १९१४ ।

# MAHÁ VÍRA CHARITA,

BY

BHAVABHÚTI.

EDITED

BY

PUNDIT TARANATH TARKAVACHASPATI.

*CALCUTTA :*

Printed AND Published.

BY

HERUMBO CHUNDER BANERJEE & Co.

AT

BISHWAPROKAS PRESS TAMER'S LANE No 5.

*Price One Rupee Eight Annas.*

1857.

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000005

BIBLIOTHEK der Deutschen Morgenländischen Gesellschaft.

Aus GILDEMEISTER'S Vermächtniss.

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000006

## ॥ বিজ্ঞাপন ॥

মহাকবি শ্রীভবভূতি প্রণীত মহাবীর চরিত সংস্কৃত ভাষায় এক উৎকৃষ্ট নাটক। এই নাটক কালক্রমে বিরলপ্রচার হইয়া উঠিয়াছে। এতদ্দেশে কেবল কলিকাতাস্থ সংস্কৃত বিদ্যালয়ে একখানি মাত্র পুস্তক ছিল। পরে কয়েক বৎসর অতীত হইল ইংলণ্ডদেশে ঐ পুস্তক মুদ্রিত ও প্রচারিত হয়। কিন্তু ঐ মুদ্রিত পুস্তকের মূল্য এত অধিক নির্দ্ধারিত হইয়াছে, যে সর্ব্বসাধারণ ছাত্রের ক্রয় করিয়া পাঠ করা দুঃসাধ্য। সুতরাং ঐ পুস্তক সংস্কৃত বিদ্যালয়ের ছাত্রবর্গের পক্ষে মুদ্রিত না হওয়ার তুল্যই হইয়াছে। এজন্য যাহাতে অল্পমূল্যে বিক্রয় হইতে পারে, এবং সর্ব্বসাধারণ ছাত্রে অনায়াসে ক্রয় করিয়া পাঠ করিতে পারে, এরূপে মুদ্রিত হওয়া আবশ্যক বিবেচনা হওয়াতে এই পুস্তক মুদ্রিত ও প্রচারিত হইল।

ইংলণ্ডের মুদ্রিত পুস্তক মুদ্রাকরণপ্রক্রিয়া অংশে অতি সুন্দর হইয়াছে বটে, কিন্তু সম্যক্ শুদ্ধ হয় নাই। এই নিমিত্ত আমরা কেবল ঐ পুস্তক পুনর্মুদ্রিত না করিয়া, সংস্কৃত বিদ্যালয়ের পুস্তকাগারে যে হস্তলিখিত পুস্তক আছে, তাহার সহিত মিলাইয়া যত দূর সম্ভব সংশোধন করিয়া মুদ্রিত করিলাম। ইহা অপেক্ষাকৃত অনেক শুদ্ধ হইয়াছে সন্দেহ নাই, কিন্তু ইহাতে একবারেই পাঠের ব্যতিক্রম নাই, সম্যক্ শুদ্ধ হইয়াছে, সাহস করিয়া এরূপ বলা যাইতে পারে না। এই গ্রন্থের যে সকল স্থল টীকাসাপেক্ষ তথায় সংক্ষেপে টীকা করিয়া দেওয়া গিয়াছে, তাহাতে পাঠের ও পাঠনার পক্ষে অনেক সুবিধা হইবেক। কিন্তু এই গ্রন্থের অনেক অংশ এরূপ আছে যে তত্তদংশের অর্থ সম্যক্ হৃদয়ঙ্গম হয় না, এজন্য সাহস করিয়া সেই সেই অংশের টীকা লিখিতে পারা যায় নাই। পূর্ব্বে উত্তরচরিত, মুদ্রারাক্ষস প্রভৃতি যে সকল নাটক মুদ্রিত হইয়াছিল, তাহাদেরও অনেক অংশের অর্থ সম্যক্ বোধবিষয় হইত না, কিন্তু তত্তদ্গ্রন্থের অধ্যাপনা আরম্ভ হওয়াতে এক্ষণে আর তত অংশ দুর্ব্বোধ নাই। অধ্যাপকদিগের বুদ্ধিবৈচিত্র্যদ্বারা তাদৃশ অনেক অংশই বিশদ হইয়া গিয়াছে, সুতরাং এরূপ প্রত্যাশা করা যাইতে পারে এই গ্রন্থের ও অধ্যাপনা আরম্ভ হইলে ক্রমে ক্রমে অনেক দুর্ব্বোধ অংশ বিশদ হইয়া উঠিবেক।

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000007

## ॥ বিজ্ঞাপন ॥

পূর্ব্বে যে সকল নাটক মুদ্রিত হইয়াছিল তাহাতে নিম্নদেশে প্রাকৃত প্রভৃতি ভাষার সংস্কৃত লিখিয়া দিবার পদ্ধতি পরিগৃহীত হইয়াছিল। কিন্তু তাহাতে বালকদিগের প্রাকৃত প্রভৃতি ভাষা শিক্ষার পক্ষে ব্যাঘাত জন্মে। ছাত্রেরা তত্তদ্ভাষায় তাদৃশ অভিনিবেশ না করিয়া সংস্কৃত দৃষ্টেই গ্রন্থের অর্থ ও তাৎপর্য্য সংগ্রহ করে, এজন্য আমরা ঐ পূর্ব্বাবলম্বিত পদ্ধতি পরিত্যাগ করিয়াছি। আর ভবভূতি অশ্লীল রচনা বিষয়ে নিতান্ত পরাঙ্মুখ, অন্যান্য সংস্কৃত কবিদিগের গ্রন্থের ন্যায় তাঁহার গ্রন্থ আদিরসে দূষিত নহে। কিন্তু এই গ্রন্থের এক স্থলে একটি আদিরস ঘটিত শ্লোক আছে। ঐ শ্লোকটী পরিত্যাগ করা গিয়াছে, এবং এক স্থলে একটী অশ্লীল শব্দ আছে, তাহাও পরিত্যক্ত হইয়াছে। কিন্তু সেই শ্লোক ও সেই শব্দ ব্যতিরেকে গ্রন্থ খণ্ডিত হয়, এজন্য নিম্নে সেই শ্লোক ও সেই শব্দ ঘটিত স্থল অবিকল লিখিত হইল। এরূপ করিবার তাৎপর্য্য এই যে অধ্যাপকদিগকে অল্পবয়স্ক ছাত্রদিগের নিকট অশ্লীল স্থল ব্যাখ্যা করিতে যে লজ্জিত ও সঙ্কুচিত হইতে হইত তাহা পরিহৃত হইল, এবং গ্রন্থ ও খণ্ডিত বলিয়া পরিগণিত হইল না॥

পরিশেষে বক্তব্য এই যে সংস্কৃত বিদ্যালয়ের অধ্যক্ষ শ্রীযুত ঈশ্বরচন্দ্র বিদ্যাসাগর এই পুস্তকের সংশোধন বিষয়ে আমার অনেক সহায়তা করিয়াছেন॥

শ্রীতারানাথ শর্ম্মা॥

কলিকাতা। সংস্কৃত কালেজ॥
সম্বৎ ১৯১৪। ৫-ই ভাদ্র॥

---

२६ । ६ । आतङ्कश्रमसाहसव्यतिकरोत्कम्पः क्षणं सह्यता
मङ्गैर्मुग्धमधूकपुष्परुचिभिर्लावण्यसारैरयम् ।
उन्नद्धस्तनकुम्भकुड्मलगुरूच्छ्वासावभुग्नस्य ते
मध्यस्य त्रिवलीतरङ्गकजुषो भङ्गः प्रिये मा च भूत् ॥२१॥
१०६ । ५ । सीता शृङ्गारलज्जां नाटयति ॥

---

॥ श्रीगणेशाय नमः ॥

# ॥ महावीरचरितम् ॥

अथ स्वस्थाय देवाय नित्याय हतपाप्मने।
त्यक्तक्रमविभागाय चैतन्यज्योतिषे नमः ॥

॥ नान्द्यन्ते (१) सूत्रधारः ॥ (२)

सूत्र। अद्य खलु भगवतः कालप्रियनाथस्य यात्रायामार्यमिश्राः समादिशन्ति

महापुरुषसंरम्भो यत्र गम्भीरभीषणः।
प्रसन्नकर्कशा यत्र विपुलार्था च भारती ॥
अप्राकृतेषु पात्रेषु यत्र वीरः स्थितो रसः।
भेदैः सूक्ष्मैरभिव्यक्तैः प्रत्याधारं विभज्यते ॥

स संदर्भोऽभिनेतव्यः (३) इति (सहर्षम्) महावीरचरितं तर्हि प्रयोक्तव्यमित्यादिष्टमर्थतो भवति।

---

(१) आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते। देवद्विज नृपादीनां तस्मान्नान्दीति संज्ञिता। पदैर्युक्ता द्वादशभिरष्टाभि र्वा पदैरुत॥ सुप्तिङन्तं पदमितिपक्षे इयमष्टपदा ॥

(२) सूत्रं प्रयोगानुष्ठानं धारयतीति स्थापकनामा नटः सूत्रधारः। वर्त्तनीयतया सूत्रं प्रथमं येन सूच्यते। रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते ॥

(३) भवेदभिनयोऽवस्थानुकारः स चतुर्विधः। आङ्गिको वाचिकश्चैवमाहार्य्यः सात्त्विकस्तथा।

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000009

वश्यवाचः कवेः काव्यं सा च रामाश्रया कथा ।
लब्धस्य वाक्यनिष्यन्दनिष्पेषनिकषो जनः ॥

सोऽहमेतद्विज्ञापयामि । अस्ति दक्षिणापथे पद्मपुरं नाम नगरम् । तत्र केचित्तैत्तिरीयिणः (१) काश्यपाश्चरणगुरवः (२) पंङ्क्तिपावनाः (३) पञ्चाग्नयो (४) धृतव्रताः सोमपीथिन (५) उडुम्बरा (६) ब्रह्मवादिनः प्रतिवसन्ति । तदामुष्यायणस्य (७) तत्रभवतो वाजपेययाजिनो (८) महाकवेः पञ्चमः सुगृहीतनाम्नो (९) भट्टगोपालस्य पौत्रः पवित्रकीर्त्तेर्नीलकण्ठस्यात्मसम्भवः श्रीकण्ठपदलाञ्छनो (१०) भवभूतिर्नाम जातूकर्णीपुत्रः कविर्मित्रधेयमस्माकमित्यत्रभवन्तो विदांकुर्वन्तु ॥

---

(१) तित्तिरिशाखाध्यायिनः ।

(२) स्वशाखाध्यायिनां श्रेष्ठाः ।

(३) अग्र्याः सर्व्वेषु वेदेषु सर्वप्रवचनेषु च । श्रोत्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावना इति मनुः ।

(४) पवनः पावनस्त्रेता यस्य पञ्चाग्नयो गृहे । सायं प्रातः प्रदीप्यन्ते स विप्रः पङ्क्तिपावनः । पवन आवसथ्योऽग्निः पावनः सभ्योऽग्निः त्रेता दक्षिणाग्निगार्हपत्याहवनीयाख्या इति पञ्चाग्निकाः ।

(५) सोमयज्ञे सोमरसपायिनः ।

(६) उम्बरमुत्कर्षमधिगताः ।

(७) तेषु मध्ये विख्यातात् पितुरुत्पन्न आमुष्यायण उच्यते इत्युक्तरूपस्य ।

(८) वाजपेयनामकयज्ञविशेषयाजिनः ।

(९) स सुगृहीतनामा स्यात् यः प्रातः सुखदः स्मृतइति ।

(१०) श्रीभारती कण्ठेयस्य सइतिपदभूषणो भारतीकण्ठोपाधिकः ।

श्रेष्ठः परमहंसानां महर्षीणामिवाङ्गिराः ।
यथार्थनामा भगवान् यस्य ज्ञाननिधिर्गुरुः ॥
तेनेदमुद्धृतजगत्त्रयमन्युमूल
मस्तोकवीरगुरुसाहसमद्भुतञ्च ।
वीराद्भुतप्रियतया रघुनन्दनस्य
धर्म्मद्रुहो दमयितुश्चरितं निबद्धम् ॥

तदिदं भवन्तः परिपुनन्तु । उक्तञ्च तेन श्रोत्रियपुत्रेण
प्राचेतसो मुनिवृषा (१) प्रथमः कवीनां
यत् पावनं रघुपतेः प्रणिनाय वृत्तम् ।
भक्तस्य तत्र समरंसत मेऽपि वाच
स्तत् सुप्रसन्नमनसः कृतिनो भजन्ताम् ।

॥ प्रविश्य नटः ॥ (२)

नटः । कृतप्रसादाः पारिषदाः । किन्तु अपूर्वत्वात् प्रबन्धस्य कथाप्रदेशं समारम्भे ज्ञातुमिच्छन्ति ।

सूत्र । सतु भगवान् दीक्षिष्यमाणः (३) कौशिको विश्वामित्र ऐक्ष्वाकस्य राजर्षेर्वशिष्ठपुरोधसो दशरथस्य गृहानुपेत्य स्वमेव तपोवनं प्रत्यागतः । सच

विजयि सहजमस्त्रै वीर्य्यमुच्छ्राययिष्यन्
जगदुपकृतिवीजं मैथिलीं प्रापयिष्यन् ।
दशमुखकुलघातश्लाघरकल्याणपात्रं
धनुरनुजसहायं रामदेवं निनाय ॥

---

(१) मुनीन्द्रः । (२) सूत्रधारसदृशत्वात्स्थापकोऽपि सूत्रधारः, तस्यानुचरः पारिपार्श्विकः तस्मात् किञ्चिदूनो नटः ।
(३) यज्ञार्थनियमं कर्त्तुम् ।

निमन्त्रितस्तेन विदेहनाथः स प्राहिणोद्भ्रातरमात्तदीक्षः ।
कुशध्वजोनाम सएष राजा सीतोर्म्मिलाभ्यां सहितोऽभ्युपैति ।

इति निष्क्रान्तौ ॥

॥ प्रस्तावना ॥ (१)

ततः प्रविशति रथस्थो राजा सूतः कन्ये च ॥

राजा । आयुष्मत्यौ सीतोर्म्मिले अद्य भगवान् विश्वामित्रः श्रद्दधानेन चेतसा वत्साभ्यां प्रणन्तव्यः ।

कन्ये । जधा कणिदुतादो आणवेदि ॥

राजा । तुरीयो ह्येष मेध्योऽग्निराम्नायः पञ्चमोऽथवा ।
अथवा जङ्गमं तीर्थं धर्म्मो वा मूर्त्तिसञ्चरः ॥

सूतः । साङ्काश्यनाथ (२) एवमेतत् । न खलु विश्वामित्रान्महर्षेर्महत्त्वेन कश्चिदपरः प्रख्यायते । यस्य भगवतस्त्रैशङ्कवं (३) शौनःशेफं (४) रम्भास्तम्भनं (५) चेत्यपरिमेयमाश्चर्य्यजातमाख्यानविद आचक्षते ।

---

(१) नटी विदूषको वापि पारिपार्श्विक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते । चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः । आमुखं तत्तु विज्ञेयं बुधैः प्रस्तावनापि च ॥

(२) विदेहान्तर्गतदेशविशेषनाथ ।

(३) त्रिशङ्कुर्बन्धुभिर्मुक्तऐक्ष्वाकः प्रीतिपूर्व्वकम् । अवाक्शिरा दिवं नीतो दक्षिणां दिशमाश्रितः ॥

(४) ऋचीकस्यात्मजश्चैव शुनःशेफो महातपाः । विमोचितो महासत्रात् पशुतामप्युपागतः ॥

(५) तपोविघ्नकरीचैव पञ्चचूडा सुसम्मता । रम्भा नामाप्सराः शापाद्यस्य शैलत्वमागता ॥

तदस्मिन् ब्रह्माद्यैरखिलदशमुनिभिर्नाथितशमे
तपस्तेजोधाम्नि स्वयमुपनतब्रह्मणि गुरौ ।
निवासे विद्यानामुपहितकुटुम्बव्यवहृति
र्भवानेव श्लाघ्यो जगति गृहमेधी गृहवताम् ॥

राजा । साधु भोः साधु सूनृतं हि सूत भाषसे । प्रकृष्टकल्याणो-
दर्कसङ्गमा ह्येते भगवन्तः साक्षात्कृतब्रह्माणो महर्षयः ।

तमांसि ध्वंसन्ते परिणमति भूयानुपशमः
सकृत् संवादेऽपि प्रथत इह चामुत्र च शुभम् ।
अथ प्रत्यासङ्गः कमपि महिमानं वितरति
प्रसन्नानां वाचः फलमपरिमेयं प्रसुवते ॥

सूतः । दृश्यते हरितपरिसरारण्यरमणीयं कौशिकीपरिच्छिन्नमाय-
तनमृषेस्तस्य सिद्धाश्रमपदं नाम । किं बहुना । अयमात्मना
तृतीयः कुशिकनन्दनो भवन्तमेवाभ्युद्यातः ।

राजा । यद्येवमवतरामो रथात् । कन्याभ्यां सहावतीर्य ।
सूत सूत उच्यन्तां सैनिकाः न कैश्चिदाश्रमाभ्यर्णभूमयः परिक्र
म्यन्तामिति ॥

सूतः । यथाज्ञापयसि इति निष्क्रान्तः ।
ततः प्रविशति विश्वामित्रो रामलक्ष्मणौ च ।
विश्वा । स्वगतम्

रक्षोघ्नानि च मङ्गलानि सुदिने कल्प्यानि दारक्रिया
वैदेह्या च रघूद्वहस्य कुशलैर्दीक्षाप्रवेशश्च नः ।
आस्थाप्यानि च तानि तानि जगतीक्षेमाय रामात्मनो
दैत्यारेश्चरिताद्भुतान्यथ खलु व्यग्राः प्रमोदामहे ।

संदिष्टंच मैथिलस्य राजर्षेरस्माभिः आचार इति यजमानोऽपि यज्ञे निमन्त्रितोऽस्मि कुशध्वजस्तु सीतोर्म्मिलाभ्यां सहितः प्रेषितव्य इति कृतश्च तत् प्रियसुहृदा ।

कुमारौ । भगवन् कः पुनरयं महात्मा यमत्रभवन्तोऽप्येवमभ्युद्याताः ।

विश्वा । श्रूयन्त एव निमिकुलात्मसम्भवा राजर्षयो विदेहेषु
तेषामिदानीं दायादो वृद्धः सीरध्वजो नृपः ।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ ॥

कुमारौ । यस्य तत् गृहेषु माहेश्वरं धनुः पूज्यते ।

विश्वा । अथ किम् ।

कुमारौ । सकौतुकम् । अथ किलान्यदपि तत्राश्चर्य्यं यदयोनिजा कन्यकेति ।

विश्वा । विहस्य । तदप्यस्ति ।

अयन्तु यजमानेन यक्ष्यमाणस्य मे गृहम् ।
प्रेषितस्तेन वात्सल्यादनुजन्मा कुशध्वजः ॥
तदस्मिन्राजर्ष्योचिये वत्साभ्यां प्रश्रयेण वर्त्तितव्यम् ।

कुमारौ । एवम् ।

राजा । तौ निर्वर्ण्य

प्रकृत्या पुण्यलक्ष्मीकौ कावेतौ ज्ञायते त्विदम् ।
राजन्यदारकौ नूनं कृतोपनयनाविति ॥
द्वितीयस्य च वर्णस्य प्रथमस्याश्रमस्य च ।
अहो रम्ये इमे मूर्त्ती वयसो नूतनस्य च ॥
तथाहि
चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोमपवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम् ।

मौर्व्या मेखलया नियन्त्रितमधोवासश्च माञ्जिष्ठकं
पाणौ कार्म्मुकमक्षसूत्रवलयं दण्डः परः पैप्पलः ॥

कन्ये । सोम्मदंसणा क्खु एदे ॥
राजा । उपसृत्य । भगवन्नभिवादये ।
विश्वा । दिष्ट्या गर्भरूपकं त्वां कुशलिनमागतं राजर्षिगृहात् पश्यामि । तत् परिष्वजस्व । आलिङ्ग्य ।

अपि प्रवृत्तयज्ञो ऽसौ विदेहाधिपतिः सुखी ।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥

राजा । नन्वार्य्यः स एकः सुखी सह पुरोधसा दैर्घतपसेन (१) यस्यैवं भवन्तः कुटुम्बवृत्तिमनुपतिताः ।
कन्ये । पणमामो ॥
राजा । लाङ्गलोल्लिख्यमानाया यज्ञभूमेः सुनिर्गता ।
सीतेयमूर्म्मिला चेयं द्वितीया जनकात्मजा ।
विश्वा । भद्रमस्तु ।
लक्ष्म । जनान्तिकम् । आश्चर्य्यमियमद्भुतसूतिरार्य्या ।
रामः । उत्पत्तिर्देवयजनात् ब्रह्मवादी नृपः पिता ।
सुप्रसन्नोज्ज्वला मूर्त्तिरस्याः स्नेहं करोति मे ।
राजा । भगवन्
कौ त्वामनुगतावेतौ क्षत्रियौ ब्रह्मचारिणौ ।
प्रतापविक्रमौ धर्म्मं पुरस्कृत्योद्गताविव ।

विश्वा । रामलक्ष्मणौ दाशरथी ।
कुमारौ । सविनयमुपसृत्य । गुरो अभिवादयावहे ।
राजा । दिष्ट्या महाराजदशरथप्रसूतिर्दृश्यते । परिष्वज्य ।

---

(१) दीर्घतपा गौतमस्तदपत्येन ।

नान्यत्र राघवाद्वंशात् प्रसूतिर्वत्सयोः क्षमा ।
दुग्धार्णवादृते जन्म चन्द्रकौस्तुभयोः कुतः ॥

श्रुतपूर्वं ह्येतदस्माभिः कर्णामृतम्

प्राप्ताः कृच्छ्राद्दृष्यशृङ्गोपचारैः
पुण्यश्लोकाः कौशलेन्द्रेण पुत्राः ।
ये दीप्तस्य श्रेयसः पारकामा
श्चत्वारोऽपि ब्रह्मचर्यं चरन्ति ॥

तदत्रभवता निष्पन्नाशिषां काममरिष्टतातिम् (१) आशास्महे सिद्ध एव तु रघूणां प्रसूतेरुत्कर्षः ।

यान् मैत्रावरुणिः प्रशास्ति भगवानाम्नायपूते विधौ
शश्वद्येषु विशामनन्यविषयो रक्षाधिकारः स्थितः ।
सावित्रस्य मनोर्महीयसि कुले तेषामवाप्तात्मनां
राज्ञां नो महिमा न जातु वचनप्रज्ञानयोर्गोचरः ।

विश्वा । अश्रान्तपुण्यकर्म्माणः पावनप्रायकीर्त्तयः ।
महाभाग्यविदस्तेषां यूयमेव स्तवक्षमाः ।

सखे विश्रम्य लौकिकाः संस्तरायान् (२) अनुप्रविशन्ति तदस्मिन् विकङ्कत (३) प्रच्छाये मुहूर्त्तमास्महे। इति सर्व्वे परिक्रम्योपविशन्ति।

॥ नेपथ्ये ॥ (४)

जय जय जगत्पते रामचन्द्र जय ॥
सर्व्वे साद्भुतमवलोकयन्ति ॥

राजा । भगवन् का पुनरियं देवता ।

---

(१) अरिष्टस्य कुशलस्य तातिं वृद्धिम्। तायः क्तिन्।
(२) संलापान्।
(३) विकङ्कतः स्रुवावृक्ष इत्यमरः।
(४) जवनिकायां नेपथ्यं स्याज्जवनिका रङ्गभूमिःप्रसाधनम्।

विश्वा। अस्त्यहल्या नाम गौतमस्य महर्षेरौतथ्यस्य धर्म्मपत्नी यस्याः शतानन्द आङ्गिरसोऽजायत। तामिन्द्रश्चकमे। तस्मात्तं गौतमदारावस्कन्दिनमहल्याजार इति निर्द्दिशन्ति। अथ भगवान् मन्युमाप। तस्यां धर्म्मपत्न्यामन्धतामिश्रमभ्यध्यायत्। सेयमद्य रामभद्रतेजसा तस्मादेनसो निरमुच्यत।

राजा। कथमप्रमेयसहजानुपमसामर्थ्य एव वत्सो वैकर्त्तनकुमारः।

सीता। सर्व्वं चानुरागं निर्वर्ण्य अपवार्य्य च। सरीरनिम्माणसरिसो णं से अणुभावो।

राजा। निश्वस्य।

रामाय पुण्यमहसे सहशाय सीता दत्तैव दाशरथिचन्द्रमसेऽभविष्यत्।
आरोपणेन पणमप्रतिकार्य्यमार्य्यस्त्रैयम्बकस्य धनुषो यदि नाकरिष्यत्।

प्रविश्य तापसः।

रावणपुरोहितः सर्व्वमायो नाम वृद्धराक्षसः प्राप्तः। स किल राजकार्य्याद्वः पश्यति।

कन्ये। ऊं रक्खसो।

कुमा। महत्कौतुकस्थानम्।

राजविश्वामित्रौ। विहस्य। आः आगच्छतु।

तापसो निष्क्रान्तः।

प्रविश्य राक्षसः।

मातामहेन प्रतिषिध्यमानः स्वयंग्रहान्माल्यवता दशास्यः।
अयोनिजां राजसुतां वरीतुं मां प्राहिणोन्मैथिलराजधानीम्॥

दृष्टस्य तत्र यजमानः स राजा। तद्वचनात् कौशिककुशध्वजावनुरुद्धोऽस्मि। इति परिक्रामति।

रामलक्ष्मणौ। सीतोर्म्मिले प्रति यथासङ्ख्यम्। आत्मगतम्। तत् किमियममृतवर्त्तिरिव चक्षुराप्याययति।

सीतोर्म्मिले । तथैव तौ प्रति । किन्ति सज्जइ इमस्सिं लोअणाणन्दे मे दिट्ठी ।

राच । उपसृत्य दृष्ट्वा च । इयं सा अद्भुताकृतिः सीता । स्थाने देवस्य पत्नी । ऋषे नमस्ते । अप्यनामयं राज्ञः ।

तौ । स्वागतम् । इहास्यताम् ।

अपि प्रभोर्वः कुशलं तस्य यस्यार्च्यत्यसौ ।
मूर्द्ध्ना स्खलत्किरीटेन शासनं पाकशासनः ।

राच । उपसृत्य । कुशलं स्वामिनः । संदिष्टश्च वो महाराजेन ।

कन्यारत्नमयोनिजन्म भवतामास्ते वयं चार्थिनो
रत्नं चेत् क्वचिदस्ति तत् परिणमत्यस्मासु शक्रादपि ।
कन्यायाश्च परार्थतैव हि मता तस्याः प्रदानादहं
बन्धुर्वो भविता पुलस्त्यपुलहप्रष्ठाश्च सम्बन्धिनः ॥

सीता । हद्धी हद्धी रक्खसो मं पत्थेदि ।

ऊर्म्मि । कहं एव्वं ।

राजविश्वामित्रौ । चिन्तयतः ।

लक्ष्म । जनान्तिकम् (१) । आर्य्य आर्य्य किं न पश्यसि निशाचरपतिर्देवीमिमां प्रार्थयते ।

रामः । वत्स । साधारण्यान्निरातङ्कः कन्यामन्योऽपि याचते ।
किं पुनर्जगतां जेता प्रपौत्रः परमेष्ठिनः ॥

लक्ष्म । अतिसौजन्यादार्य्यस्य तस्मिन्नपि निसर्गवैरिणि निशाचरे बहुमानः ।

यो नस्त्रयीपरिध्वंसात् द्वाचं तेजोऽपकर्षति ।

---

(१) त्रिपताककरेणान्यानपवार्य्यान्तरा कथा ।
अन्योन्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम् ।
स एव त्रिपताकः स्यादवक्रितानामिकाङ्गुलिरिति च ॥

ऐक्ष्वाकं यस्य राजर्षिमनरण्यं (१) किलावधीत् ॥

रामः। कामं शत्रुरिति वध्यः स्यान्न पुनरप्रमेयतपसमतिवीरमप्राकृतं प्राकृतवदर्हसि व्यपदेष्टुम्।

लक्ष्म। निरस्तवीरपुरुषाचारस्य का तस्य वीरता ॥

रामः। वत्स मा मैवम्।

यद्विद्वानपि तादृशेऽप्यभिजने धर्म्म्यात् पथो विच्युतः
किं ब्रूमोऽत्र तदन्यदेव न वसन्त्येकत्र सर्व्वे गुणाः।
लीलानिर्ज्जितषण्मुखाद्भगवतः श्रीजामदग्न्यादृते
निर्विघ्नप्रतिपन्नविश्वविजयो वीरस्तु कस्तादृशः ॥

राक्ष। ननु भोः किमत्र चिन्त्यते।

द्राङ्निष्प्रेषविशीर्णवज्रशकलप्रत्युप्तरूढव्रण
ग्रन्थ्युग्रल्लासिनि भङ्गमोघमघवन्मातङ्गदन्तोद्यमे।
भर्त्तुर्नन्दनदेवताविरचितस्रग्दाम्नि भूमेः सुता
वीरश्रीरिव तस्य वक्षसि जगद्वीरस्य विश्राम्यतु ॥

॥ नेपथ्ये कलकलः ॥

राजा। भगवन् य एते यज्ञे उपनिमन्त्रिताः पुत्रदारैः सह दिग्भ्यो महर्षयः सम्पतन्ति तत एवाक्रन्दकलिलः कलकलः।

सर्व्वे उत्तिष्ठन्ति।

लक्ष्म। का पुनरियम्

अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम्।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लल-
द्व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति ॥

विश्वा। सेयं सुकेतोर्दुहिता भार्य्या सुन्दागुरस्य च।
मारीचजननी घोरा ताटका नाम राक्षसी ॥

---

(१) दिलीपस्य वृद्धप्रपितामहम्।

कन्ये। ताद ताद भीषणा हदासा।
राजा। मा भैष्टमायुष्मन्त्यौ।
विश्वा। रामं चिबुके स्पृशन्। वत्स हन्यतामियम्।
सीता। हद्धी हद्धी। एसो एव्व एत्थ णिउत्तो।
रामः। भगवन् स्त्री खल्वियम्।
ऊर्म्मि। सुदं अज्जाए एदं।
सीता। सविस्मयानुरागम्। असदोमुहो एव्व से चित्तभेदो।
राजा। साधु रुत्यमैक्ष्वाको रामभद्रः।
राच। अयं स रामो दाशरथिः। य एवः
उत्तालताटकोत्पातदर्शने ऽप्यप्रकम्पितः।
नियुक्तस्तत्प्रमाथाय स्त्रैणेन विचिकित्सते ॥
विश्वा। त्वरतां वत्स किं न पश्यसि ब्राह्मणजनस्य महतः सङ्घातं बङ्क्रमग्रतः।
रामः। एवं भवन्तो जानन्ति
सर्वदोषानभिष्वङ्गादाम्नायसमतां गताः।
युष्माकमभ्युपगमाः प्रमाणं पुण्यपापयोः ॥
इति परिक्रम्य निष्क्रान्तः ॥
सीता। अम्मो परागदो एव्व। हद्धी हद्धी उप्पादवादाली विअ हदासा महाणुभावं अभिद्दवदि।
राजा। धनुरास्फाल्य। आः पापे तिष्ठ तिष्ठ।
ऊर्म्मि। अए दाणिं सच्चं एव्व तादो पत्थिदो।
लक्ष्म। विहस्य। पश्यन्तु भवन्तस्ताटकाम्
हृन्मर्म्मभेदिपतदुत्कटकङ्कपत्र
संवेगतत्क्षणकृतस्फुरदङ्गभङ्गा।
नासाकुटीरकुहरद्वयतुल्यनिर्य-
दुद्बुदध्वमदसृक्प्रकरा मृतैव ॥

कन्ये। अच्चरिअं अच्चरिअं। पिअं णो।

राजा। अहो दृढप्रहारिता राजपुत्रस्य।

राक्ष। हा आर्य्ये ताटके किं हि नामैतत्। अम्बुनि मज्जन्त्यलाबूनि ग्रावाणः प्लवन्त इति।

नन्वद्य राक्षसपतेः स्खलितः प्रतापः
प्राप्तो नवः परिभवोऽद्य मनुष्यपोतात्।
दृष्टः स्थितेन च मया स्वजनप्रमारो
दैन्यं जरा च निरुणद्धि कथं करोमि॥

विश्वा। एष तावदोङ्कारः।

राक्ष। अपि भोः किमस्मासु वः प्रतिवचनम्।

विश्वा। अत्र सीरध्वजो वेत्ता कनिष्ठो हि कुशध्वजः।
अस्याः पिता हि कन्यायाः कुलज्येष्ठः प्रभुश्च नः।

राक्ष। सोऽप्याह कुशध्वजो जानाति विश्वामित्रश्चेति।

विश्वा। स्वगतम्। अस्यायमवसरो दिव्यास्त्रमङ्गलानां दानस्य वर्त्तते च मङ्गल्यो मुहूर्त्तः। प्रकाशम्। सखे कुशध्वज मया हि कृशाश्वात् गुरुचर्य्याव्रतैरधिगतस्य सरहस्यजृम्भकप्रयोगसंहारस्य दिव्यास्त्रमन्त्रपारायणस्य विद्यातत्त्वबीजानि तत्प्रसादादर्पितस्य शब्दतस्य रामभद्रस्य सम्प्रति प्रकाश्यन्ते।

ब्रह्मादयो ब्रह्महिताय तप्त्वा परःसहस्राः शरदस्तपांसि।
एतान्यदर्शन् मुनयः पुराणाः स्वान्येव तेजांसि तपोमयानि॥

राजा। अनुगृहीतं रघुकुलम्।

लक्ष्म। दिष्ट्या देवदुन्दुभिध्वनिः पुष्पवृष्टिश्च।

राक्ष। आः दिवौकसोऽपि राजविरुद्धमनुमोदन्ते।

लक्ष्म। कथम्

झटित्येवोत्तप्तद्रुतकनकसिक्ता इव दिशः
पिशङ्गत्वात् सन्ध्यान्तरित इव निर्भाति दिवसः।

ज्वलत्केतु (१) व्रातस्थगितमिव दिव्यास्त्रनिचयै-
र्नभो नैरन्तर्य्यं प्रचलिततडित्पिञ्जरम् (२) इव ॥
तेजोभिर्दिशिदिशि विश्वतः प्रदीप्तै-
रादित्यद्युतिमवधीर्य्य विस्फुरद्भिः ।
पर्य्यायत्वरितगृहीतविप्रयुक्तं
सामर्थ्यं रहयति तापनो मयूखः ॥

कन्ये । समन्तदो पज्जलिदविज्जुप्पुञ्जपिञ्जरेण उक्कमंति विअ-
लोअणाइं पहावणिप्फन्देण ।

राम । अहो दुरासदं दिव्यास्त्रतेजः । संस्मरायता येन रावण-
पुरन्दरद्वन्द्वसंरम्भं स्मारितोऽस्मि

सर्व्वप्राण (३) प्रवणमघवन्मुक्तमाहत्य वज्र-
स्तत्सङ्घट्टाद्विघटितदृहत्खण्डमुच्चण्डरोचिः ।
एवं वेगात् कुलिशमकरोद्व्योम विद्युत्सहस्रै-
र्भर्त्तुर्वक्त्रज्वलनकपिशास्ते च रोषाट्टहासाः ॥

विश्वा । अभिवन्दस्व विसर्ज्जय च रामभद्र दिव्यास्त्राणि ।
ब्रह्मेन्द्र द्रविणेशरुद्रवरुण प्राचीनवर्हि (४) र्मरुत्
कालाग्निव्यतिरेकिणां भगवतामाम्नायमन्त्रात्मनाम् ।
एतेषां तपसामिवाप्रतिरथैस्तेजोभिरुत्कर्षिणा-
मेकैकस्य जगत्त्रयप्रमथनत्राणावधिर्योग्यता ॥

॥ नेपथ्ये ॥

एष प्रह्वोऽस्मि भगवन्नेषा विज्ञापना च नः ।

---

(१) केतवो धूमकेतवः ।
(२) पिञ्जरं कृष्णपीतादिमिश्रवर्णम् ।
(३) प्राणोबलं यत्नो वा ।
(४) प्राचीनवर्हिरिन्द्र पतिविशेषः ।

दिव्यास्त्रसम्प्रदायोऽयं लक्ष्मणेन सहास्तु मे ॥

विश्वा। रामभद्र एवमस्तु।

लक्ष्म। अहो प्रसादः।

झटित्युन्मीलितप्रज्ञमप्रतर्क्यैश्च शक्तिभिः।
ज्योतिर्मयमिवात्मानं मन्ये विद्याप्रकाशनात् ॥

॥ नेपथ्ये ॥

राम राम महाबाहो वयं त्वय्यायतामहे।
विश्वामित्राभ्यनुज्ञानात् सह भ्रात्रा प्रशाधि नः ॥

कन्ये। देवदाओ मन्तेन्ति। अहो अच्चरिअं अच्चरिअं ॥

॥ नेपथ्ये ॥

भगवन्तो दिव्यास्त्रनिकायाः
विश्वामित्रात्प्राप्य विश्वस्य मित्रात्पुण्यैर्युष्मानद्य रामः कृतार्थः ॥
ध्यातैर्ध्यातैः संनिधेयं भवद्भिः स्वं स्वं स्थानं यात यूयं नमो वः ॥

लक्ष्म। आर्यवचनादन्तरितान्यस्त्राणि।

राजा। भगवन्महाद्भुतनिधे कुशिकनन्दन नमस्ते।

ज्वलिततपसस्तेजोराशेर्जगत्यमितौजस
स्तव निरवधौ माहाभाग्ये कृतस्तुतिसाहसः।
प्रमितविषयां शक्तिं विन्दन्न वाचि न चेतसि
प्रतिहतपरिस्पन्दः स्तोता विषद्य (१) हृणीयते ॥

स्पृहयामि युष्मदनुगृहीतरामभद्रालङ्कृताय राज्ञे दशरथाय। वयं पुनरार्येण वञ्चिताः यद् ईदृशेन जामात्रा न संयुज्यामहे।

विश्वा। किमद्याप्य सम्भावनेयमस्मासु।

---

(१) विषण्णो भूत्वा ॥ वेः सदो ल्यप्)

राजा । शान्तम्

विश्वा । तेन हि

शम्भोर्वरादनुध्यानमात्रोपस्थानदायि वः ।
रामभद्रस्य पुरतः प्रादुर्भवतु तद्धनुः ॥

राजा । एवमस्तु । ध्यात्वा प्रणमति ।

राक्ष । स्वगतम् । एभिरन्यदेव किमपि प्रस्तुतम् । प्रकाशम् । भोः कुशध्वज कियच्चिरं विचार्य्यते ।

राजा । उक्तमेव । आर्य्या जानातीति ।

राक्ष । प्रत्युक्तमेतत् सोऽप्याह कुशध्वजो जानातीति ।

राजा । एवमेतत् ।

॥ नेपथ्ये कलकलानन्तरम् ॥

स्फूर्जद्वज्रसहस्रनिर्म्मितमिव प्रादुर्भवत्यग्रतो
रामस्य त्रिपुरान्तकृद्दिविषदां तेजोभिरिद्धं धनुः ।

सीता । अपवार्य्य । सम्पदं संसइद ह्मि ।

विश्वा । राजानं प्रति । शुण्डारः कलभेन यद्वदचले वत्सेन दोर्दण्डकस्तस्मिन्नाहित एव ।

ऊर्म्मि । अवि णाम एव्वं भवे ।

राजा । गर्जितगुणं कृष्णाञ्च

ऊर्म्मि । हृष्टां लज्जितां सीतामालिङ्ग्य । दिट्ठिआ वड्ढामो ।

राजा । साङ्गुतम् । भग्नञ्च तत् ॥

राक्ष । स्वगतम् । अहोदुरात्मानोरामहतकस्य सर्व्वङ्कषःप्रभावः ।

लक्ष्म । दोर्लीलाञ्चितचन्द्रशेखर धनुर्दण्डावभङ्गोद्गत
ष्टङ्कारध्वनिरार्य्यबालचरितप्रस्तावनाडिण्डिमः ।
द्राक्पर्य्याप्तकपालसम्पुटमिलद्ब्रह्माण्डभाण्डोदर
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति ॥

राजा । सहर्षोन्मादमिव ।

एह्येहि वत्स रघुनन्दन रामचन्द्र
चुम्बामि मूर्द्धनि चिराय परिष्वजे त्वाम्।
आरोप्य वा हृदि दिवानिशमुद्वहामि
वन्दे ऽथवा चरणपुष्करकद्वयं ते ॥

प्रविश्य रामः। कथमतिवात्सल्यादतिक्रमोऽपि।

विश्वा। गुरुर्भवानर्भकरूपश्च ते वत्सो रामभद्रः।

राजा। तं प्रणम्य। भगवन्
रामेऽपि पत्न्या सीतायाः पूर्णास्ता युष्मदाशिषः।
अस्मिन्निवोत्सवे दत्ता लक्ष्मणाय मयोर्म्मिला ॥

कन्ये। सास्रम्। अह्महे दिस्सह्ल ॥

रात्र। स्वगतम्। इष्टं द्रष्टव्यम्।

विश्वा। सुष्ठु शिरसा बहु मन्यामहे। वक्तव्यशेषस्त्वस्मि।

राजा। नन्वाज्ञापय।

विश्वा। दुहितरौ ते माण्डवी श्रुतकीर्त्तिश्च भरतशत्रुघ्नाभ्यामर्थये।

रात्र। स्वगतम्। पश्यत वनेचरस्य सतः क्षत्रिये कुटुम्बवैजात्यं ब्राह्मणस्य।

राजा। भगवन् किमत्र किञ्चिद्विचार्य्यमस्ति। किन्त्वत्र वस्तुनि परवानस्मि।

विश्वा। केन।

राजा। एकेन तावद्भवतैव।

विश्वा। अथान्येन केन।

राजा। आर्य्यसीरध्वजेन गौतमेन शतानन्देन च।

विश्वा। अपहसन्। सीरध्वजशतानन्दयोरहं विवेक्ता।

राजा। भगवानिदानीं जानाति
जनकानां रघूणाञ्च सम्बन्धः कस्य न प्रियः।
यत्र दाता ग्रहीता च कल्याणप्रकृतिर्भवान् ॥

विश्वा । वत्स शुनःशेफ (१) अयोध्यां गत्वा ब्रूहि भगवन्तमस्मद्वचनाद्वसिष्ठम् ।

एतास्चतुर्भ्यो रघुनन्दनेभ्यो निमेर्गृहे राजसुतास्चतस्र ।
वसिष्ठवद्गौतमवच्च भूत्वा दत्ताः प्रतीष्टाश्च समं मयैव ॥

तदुपनिमन्त्र्य सर्वान्महर्षीन्महाराजदशरथस्यानुयातो वैदेहनगरमागच्छ । तदा मम मैथिलस्य च राज्ञो यज्ञसमाप्तौ विततगोदान (२) मङ्गलाः कुमाराः परिणेष्यन्तीति ।

कुमा । स्वगतम् । प्रियात् प्रियतरं नः ।

कन्ये । दिट्ठिआ अविप्पवासो दाणिं भइणिआणं भविस्सदि ।

राक्ष । अद्यापि भोः शृणुत धर्म्माचारम् । अनर्थ एव वो यत् कन्येयमन्यस्मै दीयतइति ।

पौलस्त्येऽयाऽपि नयेन याचत इति श्लाघ्येऽपि वो नादरः
सम्बन्धे सति यत् त्रिलोकपतिना सख्यं न तत्र स्पृहा ।
गन्तव्या पुनरन्यथैव नियतं लङ्काऽपि नः सीतया
तन्मा भूदिह वः पुरन्दरपुरीवन्दिप्रसक्तो विधिः ॥

॥ नेपथ्ये कलकलः ॥

राजा । तत् कावेतावकालपर्ज्जन्यभीमौ द्वन्द्वेन (३) धावतः ।

विश्वा । एतौ सुबाहुमारीचौ पुत्रौ सुन्दोपसुन्दयोः ।
रावणानुचरौ घोरौ यज्ञप्रत्यूहकारिणौ ॥
तद्वतसौ रामलक्ष्मणौ हन्यतामेष यज्ञप्रत्यूहः ।

---

(१) ऋचीकात्मजः शुनःशेफनामा विश्वामित्रशिष्यः ।

(२) गावः केशा दीयन्ते छिद्यन्ते अस्मिन्निति गोदानं केशकर्त्तनसंस्कारः । केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते । राजन्यबन्धो द्वाविंशे वैश्यस्य द्व्यधिके ततइति मनूक्तम् ।

(३) सम्भूय ।

तौ। यथाज्ञापयसि इति विकटं परिक्रामतः।

कन्ये। एत्थ दाणिं कहं।

राच। हन्त साध्विव सम्पन्नं विपर्य्यस्तोविधि (१) र्भवेत्।
तदीच्य कार्य्यपर्य्यन्तं माल्यवत्युपवेदये॥

राजा। धनुरास्फालयन् वत्स रामभद्र वत्स लक्ष्मण अप्रमत्तः प्रमत्तं विजयस्व। अयमहं परागतएव।

विश्वा। विहस्य सहस्तग्राहम्।

राजन्नितोच्छिद्धि सहानुजस्य रामस्य पश्याप्रतिमानमोजः।
ब्रह्मद्विषोच्छेष छिनत्ति सर्वानाथर्वणस्तीव्रइवाभिचारः॥

॥ इति निष्क्रान्ताः सर्व्वे ॥

॥ कौमारो (२) नाम प्रथमोऽङ्कः (३) ॥

ततः प्रविशत्युपविष्टः सचिन्तो माल्यवान्।

माल्य। भोः यतःप्रभृति सर्वमायात् सिद्धाश्रमवृत्तान्तमश्रौषं तत आरभ्य

दूराद्द्वीयो धरणीधराभं यस्ताटकेयं (४) तृणवद्व्यधूनोत्।
हन्ता सुबाहोरपि ताटकारिः स राजपुत्रो हृदि बाधते माम्॥

---

(१) विधिर्यज्ञोविपर्य्यस्तोविनाशितः॥

(२) कुमारयोश्चरितसम्बन्धी।

(३) यदा तु सरसं वस्तु मूलादेव प्रवर्त्तते। आदावेव तदाऽङ्कः स्यादामुखाचेपसंश्रय इति॥ प्रत्यचनेतृचरितो रसभावपुरस्कृतः। अङ्को नानाप्रकारार्थसंविधानरसाश्रय इति च॥

(४) ताटकापत्यं मारीचम्।

तदनुस्रवानां (१) च भूयसां क्षणेनैकेन वध इति किमेतदित्याश्चर्य्यम्।

वीर्य्योत्कर्षैर्यदद्भुतभुजां निर्म्ममे पद्मयोनि-
स्तस्य द्वैधं व्यधित धनुषः शाम्भवीयस्य रामः।
दिव्यास्त्रोपनिषदृषेर्यः कृशाश्वस्य शिष्या-
द्विश्वामित्राद्विजयजननीमप्रमेयः प्रपेदे ॥

प्रसह्य रावणद्विष्टमस्त्रं दूतस्य पश्यतः।
अस्त्रदानाद्भुतं काले प्रौढेन मुनिना कृतम् ॥

यतः। सीतावन्दिग्रहपरिभवस्तस्य राज्ञो निरस्तो
नीतं चास्मान् प्रति शिथिलतामैकमुख्यं सुराणाम्।
नान्दीनादप्रभृति हि कृतं मङ्गलं तैस्तदानीं
सर्वं प्रायो भजति विकृतिं भिद्यमाने प्रतापे ॥

कथं वत्सा शूर्पणखा प्राप्ता।

प्रविश्य शूर्पणखा

जेदु जेदु मादामहो।

माल्य। वत्से आस्यताम्। का राजसन्निधौ वार्त्ता।

शूर्प। णिब्बुत्ताइं किल तहिं पाणिग्गहणाइं। अस्सं च। अगत्थिमहेसिणा रामस्स मङ्गलोबहारिअं माहिन्दं धणुब्बरं अणुप्पेसिदं।

माल्य। यानि भुवनेष्वतर्क्यसामर्थ्यान्यायुधानि तानि रामे ब्रह्मर्षिभ्यः परिणमन्ति। सचिन्तम्।

अमोघमस्त्रं चक्रस्य ब्राह्मणानामनुग्रहः।
दुरासदं च तत्तेजः क्षात्रं च ब्रह्मसंयुतम् ॥

शूर्प। माणुसमेत्तए बि एत्तिए का चिन्ता।

माल्य। वत्से मा मैवम्

---

(१) तदनुचराणाम्।

उत्पत्त्यैव हि राघवः किमपि तद्रूपो जगत्यद्भुतं
मर्त्यत्वे न किमत्र यस्य चरितं देवासुरैर्गीयते ।
वसुष्वादधते च शक्तिविषयो देवाश्च तर्कंतरां
मर्त्यादेव वरप्रदानसमये ब्रह्मा भयं नो जगौ ॥

अपिच । निसर्गेण स धर्म्मस्य गोप्ता धर्म्मद्रुहो वयम् ।
अर्थो (१) विरोधः शक्तेन जातो नः प्रतियोगिना ॥

शूर्प । को सन्देहो । जह दसमुहो इसि मउलिएहिं विस दिट्ठीहिं ओहीअमाणलोललोअणो (२) णमन्तअअणो बट्टदि तह जाणामि दारुणो से हिअअबेअणाबेओ ण एव्वं बिरमिस्सदि त्ति ।

माल्य । अहो नु खलु भोः
वन्द्या विश्वसृजो युगादिगुरवः स्वायम्भुवाः सप्त ये
वैदेहस्य वयं च ते च किमहो सम्बन्धिनो न प्रियाः ।
तन्नामास्तु दुरासदेन तपसा दीप्तस्य दीप्तश्रियः
पौलस्त्यस्य जगत्पतेरपि कथं जाता हृदि न्यूनता ॥

अथवा । अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभोः प्रत्युत
द्रुह्यन् दाशरथि विरुद्धचरितो युक्तस्तया कन्यया ।
उत्कर्षं च परस्य मानयशसो विस्रंसनं चात्मनः
स्त्रीरत्नं च जगत्पति दशमुखो दृप्तः कथं मृष्यते ॥

॥ नेपथ्यार्द्धप्रविष्टः प्रतीहारः ॥

यः परशुरामस्य युष्माभिर्वार्त्ताहारः प्रहितः तेनेदं तमालरसविन्यस्ताक्षरं तालीपत्रमुपनीतम् । उपक्षिप्य निष्क्रान्तः ।

---

(२) अर्थसिद्धः ।
(२) अपह्रियमाणलोललोचनः ॥

माल्य। गृहीत्वा वाचयति। स्वस्ति महेन्द्रद्वीपात् परशुरामो लङ्कायाममात्यं माल्यवन्तमभ्यर्हयति।

शूर्प। कहं पज्जब्ब (१) सिलिटदुक्खमं लिहदि।

माल्य। अद्यैव परममाहेश्वरं लङ्केश्वरमभिनन्द्य ब्रवीति विदितमेतद्वो यदस्माभिर्दण्डकारण्यतीर्थोपासकेभ्यस्तपोधनेभ्यः प्रतिज्ञातमभयम्। तत्र विराधदनुकबन्धप्रभृतयः केऽप्यभिचरन्तीति श्रुतम्। तत्तान् प्रतिविध्य सद्वृत्तिमस्मद्भितां च माहेश्वरप्रीतिमनुरुद्ध्यन्तां भवन्तः।

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यस्य वो मित्रमन्यथा दुर्मनायते ॥ इति

शूर्प। ईसि मसिणाबट्टम्भ गम्भीरगुरुओ उबक्खासो।

माल्य। अहो किमुच्यते। जामदग्न्यः खल्वसौ।

अभिजनतपोविद्यावीर्य्यक्रियातिशयैर्निजै-
रुपचितशमः सर्वत्यागान्निरीहतया स्थितः।
व्यपदिशति नः शैवप्रीत्या कथञ्चिदनास्थया
प्रभुरिव पुनः कार्य्ये कार्य्ये भवत्यतिकर्कशः ॥

इति चिन्तयति।

शूर्प। किं चिन्तीअदि।

माल्य। वत्से

यदि प्रपद्येत धनुः प्रमाथः शिष्याय शम्भोर्न तितिक्षते सः।
आयोधने चेदुभयोर्निघातः संरम्भयोगादिति हि प्रियं नः ॥

अन्यतरविजयेऽपि तु क्षत्रियान्तकरश्चेद्राजपुत्रं विजयते नैनमनभिहत्य रोषेण विरमेत्। एवञ्च सिद्धं नः समीहितं

---

(१) प्रभुरिव।

रामनिधनम्। ऐक्ष्वाकस्तु विजयमानो ब्राह्मण्यो न ब्रह्मर्षिमभिहन्यात्। निःश्रेयसापन्ने अपस्तुतमपि शस्त्रं प्रणिदध्यात् एवञ्च दुष्टतरं स्यात्।

शूर्प। को बिसेसो।

माल्य। यदि जामदग्न्यस्तावदण्यव्रतो हन्याद्राघवं हत्वाऽपि पुनस्तादृश एव। संधार्य्य खु राजपुत्रः पुनरुत्थातुकामस्तं चेत् प्रहृष्टतममुत्साहशक्तिसम्पदा धर्म्मविजयिनं विजयेत सर्व्वे तं विजयिनमनुजानीयुः। तदैव हठाक्रान्त्या निभृतक्रुद्धा देवाः प्रसह्यैनमधिकुर्य्युः। नित्याऽनुषक्तो ह्यसुरविजयिनामवमानतः प्रकृतिकोपः।

पौलस्त्यापचयप्रचण्डचरिते यः कार्त्तवीर्य्ये मुनिः
सर्व्वक्षात्रकथासमापनविधेः प्राङ् मङ्गलं प्राकरोत्।
तस्मिन्नप्युपनीतयक्षदमनः स्यादूर्ज्जितासत्क्रिये
सामर्थ्ये सति धर्म्मसौम्यचरितो विश्वस्य रामः पति॥

शूर्प। तदो एत्थ किं दाणिं चिन्तिदं।

माल्य। परशुरामोत्तेजनं कर्त्तव्यमिति।

शूर्प। पक्खन्तरे महादोसो।

माल्य। तत्रापि शक्तितः प्रतिविधास्यते। किन्तु

तान्येव यदि भूतानि ता एव यदि शक्तयः।
ततः परशुरामस्य न प्रतीमः पराभवम्॥

तदुत्तिष्ठ मिथिलाप्रस्थानाय जामदग्न्यमुत्तेजयितुं महेन्द्रद्वीपमेव गच्छावः। द्रष्टव्यश्च तत्र भगवान् भार्गवः।

गभीरोमाहात्म्यात् प्रथमशुचिरत्यन्तसुजनः
प्रसन्नः पुण्यानां प्रचयइव सर्वस्य सुखदः।
प्रभुत्वस्योत्कर्षात् परिणतिविशुद्धेश्च तपसा
मसौ दृष्टः सत्त्वं प्रबलयति पापञ्च नुदति॥

॥ उत्थाय परिक्रम्य निष्क्रान्तौ ॥

॥ विष्कम्भकः ॥ (१)

॥ नेपथ्ये ॥

भोभो विदेहनगरीगताः कुलचारिणः कथयन्तु भवन्तः कन्यान्तःपुरगताय रामभद्राय ॥

कैलासोद्धारसारत्रिभुवनविजयौर्ज्जित्यनिष्णातदोष्णः
पौलस्त्यस्यापि हेलापहृतरणमदो दुर्द्दमः कार्त्तवीर्य्यः ।
यस्य क्रोधात् कुठारप्रविघटितमहास्कन्धबन्धः स्थवीयो
दोःशाखादण्डमुण्डस्तरुरिव विहितः कुल्यकन्दः(२)पुराऽभूत् ॥
सोऽयं त्रिःसप्तवारानविकलविहतक्षत्रतन्त्वप्रसारो
वीरः क्रौञ्चस्य भेदात् कृतधरणितलापूर्व्वहंसावतारः ।
जेता हेरम्बभृङ्गिप्रमुखगणचमूचक्रिणस्तारकारे-
स्त्वां पृच्छन् जामदग्न्यः स्वगुरुहरधनुर्भङ्गरोषादुपैति ॥

ततः प्रविशति सधैर्य्यसंभ्रमो रामः सीता सख्यश्च ।

रामः । दिष्ट्या ।

माहाभाग्यमहानिधिर्भगवतो देवस्य दग्धुः पुरा
साम्नायेन विशुद्धसर्व्वचरितः शिष्यो भृगूणां पतिः ।
द्रष्टव्यः स च मां दिदृक्षुरपि च त्यक्त्वा ह्रियं मुग्धया। (३)
संत्रासान्निज आभिजात्यनिभृतः(४) स्नेहो मयि द्योत्यते ॥

---

(१) वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥
(२) अस्थिमूलोऽवशिष्टद्रुतिशेषः ।
(३) अचिरोढया सीतया ।
(४) लज्जासंकुचितः ।

सीता। हला सहीओ कहं दाणिं एदं।

सख्यः। कुमार अलं दाव तुवराए।

रामः। नोत्साहः परिधारणावैरस्यमर्हति।

सख्यः। बारं बारं णिक्खत्तीकिदसमत्तजीअलोओ णिव्वडिद बिसमब्बबसाअसाहसो अ परसुरामो सुणीअदि।

रामः। किमेकदेशेन महात्मानानिधेर्माहात्म्यमुपसंह्रियते। यएवः
उत्खातक्षितिपालवंशगहनास्त्रिःसप्तकृत्वो दिशः
कृत्वा विश्रुतकार्त्तिकेयविजयश्लाघस्य बाहोर्बलात्।
सद्वीपामथ कश्यपाय गुरवे दत्त्वाऽश्वमेधे मही
मस्तव्यस्तसमुद्रमुक्तविषयावस्थस्तपस्तप्यते॥

॥ नेपथ्ये ॥

सत्त्वभ्रंशविषादिभिः कथमपि चक्षेक्षणं वेत्रिभि
र्दृष्टो दृष्टिविघातजिह्मितमुखैरव्याहतप्रक्रमः।
रामान्वेषणतत्परः परिजनैरुन्मुक्तहाहारवं
कन्यान्तःपुरमेव हा प्रविशति क्रुद्धो मुनिर्भार्गवः॥

रामः। नन्वेत एव शिष्टाचारपद्धतेः प्रणेतारः। तत्कथमयं विद्वान् प्रमाद्यति। भवतूपसर्पामि। सधैर्य्यं विकटं परिक्रामति।

सख्यः। अह्मो समन्तदो हाहा देब चन्दमुह रामचन्द हा जामाउ त्ति परिदेबणामुहरकादरुब्बिग्गसमत्तपरिजणपलबिदं अन्तेउरं बट्टदि। ता भट्टिदारिए सत्रं एब्ब बिसबेहि भट्टिदारअं।

सीता। तेण तुबरन्तीओ सम्भाबेह्म बेअपसरिअं अज्जउत्तं।

॥ इति परिक्रामति ॥

---

सख्यः। कुमार कुमार अबेक्ख दाव तुबराविसंखलमाणबिहलिदुबभन्तगमणं भट्टिदारिअं।

रामः। सप्रेमानुकम्पम् प्रतिनिवृत्य। ननु कातरेयमत्रभवतीभिरेव पर्य्यवस्थापनीया।

सख्यः। सहि सहि सुरासुरमहणसमत्थं तेल्लोक्कमङ्गलं तुङ्गजअलच्छीलच्छणमिमं सब्भिमबिअसन्तकन्दड (१) सोहाभरन्तमुहपुण्डरीअबित्थारिदसिणेहसम्भमा सव्वदा अह्मपुरदो बसेसि ता किन्ति बिजआभिमुहे कुमारे उब्भन्तासि।

सीता। सव्वक्खत्तिअसन्तापआरी परसुरामो त्ति।

रामः। प्रिये स्वस्था सती निवर्त्तस्व।

आतङ्क इत्यादि। ॥०॥ ॥०॥ ॥०॥ ॥०॥ ॥०॥ ॥०॥ ॥०॥ ॥०॥ ॥०॥

॥ नेपथ्ये ॥

। भोः भोः परिस्कन्नाः (२) क्व रामो दाशरथिः।

स्त्रियः। हद्धी हद्धी। एणं एव्व एसो वाहरदि।

रामः। तस्यायमनरालसाहसप्रचण्डकर्म्मणः प्रतिभिन्नपुष्करावर्त्तकस्तनितमांसलो वाङ्निर्घोषः कर्णविवरमाप्याययति।

॥ इति परिक्रामति ॥

सीता। का गदी। धनुषि धारयन्ती। अज्जउत्त ण दाव तुह्मेहिं गन्तव्वं। जाव तादो णागच्छदि।

सख्यः। उग्घाटिदं दाणिं पिअसहिए रसन्तरेण लज्जालुइत्तणं।

रामः। स्वगतम्। जितं जितं स्नेहेन। प्रकाशम्। तर्हि मुक्त्वा धनुर्गच्छामि॥

॥ नेपथ्ये ॥

। भो भोः परिस्कन्ना इत्यादि पुनः पठति।

सीता। तदो बलादेव धारइस्सं।

रामः। हन्त हन्त।

---

(१) कन्दडं कन्दटमुत्पलम्।

(२) अन्तःपुररक्षकविशेषाः।

उत्सिक्तस्य तपःपराक्रमनिधेराभ्यागमादेकतः
सत्सङ्गप्रियता च वीररभसोन्मादश्च मां कर्षतः ।
वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलय-
न्नानन्दी हरिचन्दनेन्दुशिशिरस्निग्धो रुणद्ध्यन्यतः ॥

सख्यः । एसो दिप्पन्तदिणअरालोअपेच्छिज्जन्तदेहपहापरिक्खेवभासुरं ज्जलन्तं सुणिसिदं परसुं धारअन्तो विसंखलुव्वेल्लन्तबहलसिहासहस्सवन्देहिदजटाभरो सुदूरविक्खेवाविद्धविअडोरुदण्डणिव्भराभिघादविहलाविदवसुन्धरो पराःगदो जेव्व सो सअलक्खत्तिअमहारक्खसो ।

रामः । अयं स भृगुनन्दनस्त्रिभुवनैकवीरो मुनि
र्यएव निचयो महानिव दुरासदस्तेजसाम् ।
प्रतापतपसोरिव व्यतिकरः स्फुरन्मूर्त्तिमान्
प्रचण्डइव पिण्डतामुपगतस्य वीरो रसः ॥

॥ सविस्मयम् ॥

पुण्योऽपि भीमकर्म्मा निधिर्व्रतानां चकास्त्यमितशक्तिः ।
मूर्त्तिमभिरामघोरां बिभ्रदिवाथर्व्वणो निगमः ॥

अयं हि । कल्पापायप्रणयि दधतः कालरुद्रानलत्वं
संरब्धस्य त्रिपुरजयिनो देवदेवस्य तिग्मः ।
ब्रह्मच्छद्मा निखिलभुवनस्तोमनिर्म्माथयोग्यो
राशीभूतः पृथगिव समुत्थाय सामर्थ्यसारः ॥

अहो स्वाच्छन्द्यवैचित्र्यमत्रभवतः ।
ज्योतिर्ज्वालाप्रचयजटिलः संनिधत्ते कुठार-
स्तूणीरोऽंसे वपुषि च जटाचापचीराजिनानि ।
पाणौ बाणः स्फुरति बलयीभूतलीलाक्षसूत्रे
वेषः शोभां व्यतिकरवतीमग्र्यशान्तस्तनोति ॥

प्रिये गुरुरयं तदपहत्य कृतावगुण्ठना भव ।

सीता । हद्धी हद्धी परागदो एव्व । अञ्जलिं बद्ध्वा । अज्जउत्त परित्ताअसु मं पिअसाहसिअ पसीद ।

रामः । अयि प्रिये

मुनिरयमथ वीरस्ताहृशस्तत् प्रियं मे
विरमतु परिकम्पः कातरे क्षत्त्रियाऽसि ।
जगति विततकीर्त्तेर्दर्पकण्डूलदोष्णः
परिसरणसमर्थो राघवः क्षत्त्रियोऽहम् ॥

॥ ततः प्रविशति क्रुद्धो जामदग्न्यः ॥

जाम । अहो दुरात्मनः क्षत्त्रियवटोरनात्मज्ञता ।
न त्वस्त्वं यदि नाम भूतकरुणासन्तानशान्तात्मन-
स्तेन व्यारुजता धनुर्भगवतो देवाद्भवानीपतेः ।
तत्पुत्रस्तु मदान्धतारकवधाद्विश्वस्य दत्तोत्सवः
स्कन्दः स्कन्द इव प्रियोऽहमथवा शिष्यः कथं न श्रुतः ॥

एष मे प्रशमस्य कर्कशः परिणामः

यत् क्षत्त्रियेष्वपि पुनः स्थितमाधिपत्यं
तैरेव सम्प्रति धृतानि पुनर्धनूंषि ।
उन्माद्यतां भुजबलेन मयापि कष्ट-
मुच्छृङ्खलानि चरितानि पुनः श्रुतानि ॥

रामः । अकलिततपस्तेजोवीर्यप्रथिम्नि यशोनिधा-
ववितथमदाध्माते रोषान्मुनावभिधावति ।
अभिनवधनुर्विद्यादर्पक्षमाय च कर्म्मणे
स्फुरति रभसात् पाणिः पादोपसंग्रहणाय च ॥

किन्त्वविषयस्तावदाचारस्य ।

जाम । भो भोः परिस्कन्नाः क्व रामो दाशरथिः ।

रामः । अयम् भोः इतइतो भवान् ।

जाम। साधु राजपुत्र साधु। सत्यमैक्ष्वाकः खल्वसि।

अन्विष्यतः प्रमथनाय ममापि दर्पा-
दात्मानमर्पयसि जातिविशुद्धसत्त्वः।
गन्धद्विपेन्द्रकलभः करिकुम्भकूट
कुट्टाक (१) पाणिकुलिशस्य यथा मृगारेः॥

स्त्रियः। सत्तं पाबं पडिहदममङ्गलं।

जाम। निर्वर्ण्य स्वगतम्। रमणीयः क्षत्रियकुमार आसीत्।

चञ्चत्पञ्चशिखण्डमण्डलमसौ मुग्धप्रगल्भं शिशु
र्गम्भीरश्च मनोहरश्च सहजश्रीलक्ष्म रूपं दधत्।
द्राग्दृष्टोऽपि हरत्ययं मम मनः सौन्दर्यसारश्रिया
हन्तव्यस्तु तथापि नाम धिगहो वीरव्रतक्रूरताम्।

प्रकाशम्।

प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वैधाक्रियाविर्भवत्
क्रोधप्रेरितभीमभार्गवभुजस्तम्भावविद्धः क्षणात्।
सज्वालः परशुर्भवत्वशिथिलस्त्वत्कण्ठपीठातिथि
र्येनानेन जगत्सु खण्डपरशुर्देवो हरः ख्याप्यते॥

स्त्रियः। हद्धी हद्धी पज्जलिदो क्खु एसो।

रामः। सधैर्यबहुमानकौतुकं निर्वर्ण्य। अयं सः यः किल पुरा सपरिवारकार्त्तिकेयविजयावर्ज्जितेन भगवता नीललोहितेन सहस्रपरिवत्सरान्तेवासिने तुभ्यं प्रसादीकृतः परशुः।

सख्यः। भट्टिदारिए पेक्ख हित्रअभरिअउब्बमन्तबहुमाणो णिक्कम्पधीरगरुत्तणेण ओहसइ भअबदो भअबस्सआसादो आउहलम्भं भट्टिदारओ।

सीता। सविस्मयास्रं पश्यति।

जाम। स्वगतम्। आश्चर्यमाश्चर्यम्। अन्यएवायम्प्रकारः। किमपि

---

(१) कुट्टाकश्छेदकः।

चैतदसंविज्ञातपदनिबन्धनमाहात्म्यं सौजन्यञ्च। संरम्भगम्भीरधीरस्य पौरुषावष्टम्भः। प्रकाशम्। राम दाशरथे स एवायमाचार्य्यपादानां प्रियः परशुः।

सख्यः। क्खणं उस्सन्तस्स (१) बिअ आलाबो।

जाम।
अस्त्रप्रयोगखुरली (२) कलहे गणानां
सैन्यैर्वृतोऽपि जित एव मया कुमारः।
एतावताऽपि परिरभ्य कृतप्रसादः
प्रादादिमं प्रियगुणो भगवान् गुरुर्मे॥

रामः। स्वगतम्। कथमेतावताऽपीत्याह अहो गर्वगौरवस्याभोगः। प्रकाशम्। अतश्च भगवन् दिवःपृथिव्योर्विततस्ते वीरवादः।
येनैव खण्डपरशुर्भगवान् प्रचण्ड-
श्चण्डीपतिस्त्रिभुवनेषु गुरुः प्ररूढः।
तेनैव तारकरिपोर्विजयार्ज्जितेन
दीप्तिं गता परशुराम इति श्रुतिस्ते॥

किञ्च। उत्पत्तिर्जमदग्नितः स भगवान् देवः पिनाकी गुरु
र्वीर्य्यं यत्तु न तद्गिरां पथि न तद्व्यक्तं हि तत्कर्म्मभिः।
त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः
सत्यब्रह्मतपोनिधे भगवतः किं वा न लोकोत्तरम्॥

सख्यः। जाणादि महाभाओ गुरुअरमणिज्जं मन्तिदुं।

जाम। राम राम नयनाभिरामताभाशयस्य सदृशीं समुद्वहन्।
अप्रतर्क्यगुणरामणीयकः सर्वथैव हृदयङ्गमोऽसि मे॥

अपि च। हेरम्बदन्तमुसलोल्लिखितैकभित्ति
वक्षो विशाखविशिखव्रणलाञ्छितं मे।

---

(१) उच्छ्वसत इव
(२) खुरली अभ्यासः।

रोमाञ्चकञ्चुकितमद्भुतवीरलाभात्
सत्यं ब्रवीमि परिरब्धुमिवेच्छति त्वाम् ॥

सख्यः। भट्टिदारिए पेक्ख भट्टिणो सोहग्गं। तुमं क्खु णिच्च परम्मुही अत्ताणअं वञ्चसि।

सीता। सास्रं निश्वसिति।

रामः। भगवन् परिरम्भणमिति प्रस्तुतप्रतीपमेतत्।

सख्यः। धीरमसिणो अत्तणो माहप्पसोहिदो से विणओ।

जाम। स्वगतम्। अहो स्वगुणपरगुणोत्कर्षपरिणामग्राहि सौजन्यपूतमन्तःकरणमस्य राजन्यपोतस्य। पारमार्थिकविनयद्विभावस्त्वतिनिपुणबुद्धिग्राह्यो महानहङ्कारः।

अप्राकृतस्य चरितातिशयस्य भावै
रत्यद्भुतैर्मम हृतस्य तथाप्यनास्था।
कोऽप्येष वीरशिशुकाकृतिरप्रमेय
माहात्म्यसारसमुदायमयः पदार्थः ॥ (१)

आश्चर्यम्। सम्भाव्यमिष्टभुवनाभयदानपुण्य
सम्भारमस्य वपुरञ्च हि विस्फुरन्ति।
लक्ष्मीश्च सात्त्विकगुणोज्ज्वलितश्च तेजो
धर्म्मश्च मानविजयौ च पराक्रमश्च ॥

अयं हि। त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः
क्षात्रो धर्म्मः श्रित इव तनुं ब्रह्मकोशस्य गुप्त्यै।
सामर्थ्यानामिव समुदयः सञ्चयो वा गुणाना-
माविर्भूय स्थित इव जगत्पुण्यनिर्म्माणराशिः ॥

प्रकाशम्। हे भवत्यः प्रविशत्वियं वधूरभ्यन्तरमेव।

रामः। स्वगतम्। एवमेव।

---

(१) मम अप्राकृतस्य चरितातिशयस्यात्यद्भुतैर्भावैर्हृतस्याप्यस्य तथाऽनास्था।

॥ नेपथ्ये ॥

सीरध्वजो धनुष्पाणिरित एवाभिवर्त्तते ।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥

सख्यः । भट्टिदारिए परागदो एव्व तादो एहि अब्भन्तरं पबिसह्म

सीता । स्वगतम् । भअबदि संग्गामसिरि एसो दे अञ्जली ।

॥ इति निष्क्रान्ताः स्त्रियः ॥

जाम । स एष राजा जनको मनीषी पुरोहितेनाङ्गिरसेन गुप्तः ।
आदित्यशिष्यः किल याज्ञवल्क्यो यस्मै मुनिर्ब्रह्म परं विवब्रे ॥
सदृत्त एव तथापि तु चत्रियइति शिरःशूलमुत्कोपयति ।

॥ ततः प्रविशतः संभ्रान्तौ जनकशतानन्दौ ॥

शता । राजन् किमद्य युक्तम् ।

जन । भगवन्

ऋषिरयमतिथिस्ते दिष्टरः पाद्यमर्घं
तदनु च मधुपर्कः कल्प्यतां श्रोत्रियाय ।
अथ नु रिपुरकस्माद्द्वेष्टि नः पुत्रभाण्डे
तदिह नयविहीने कार्म्मुकस्याधिकारः ॥

॥ इति परिक्रामतः ॥

रामः । तत् किमित्यतिवाष्पायितं भवता ।

जाम । न किञ्चित्

संभूयैव सुखानि चेतसि परं भूमानमातन्वते
यत्रालोकपथावतारिणि रतिं प्रस्तौति नेत्रोत्सवः ।
स त्वं नूतन एव कङ्कणधरः श्रीमान् प्रियस्तेतसो
हन्तव्यः परिभूतवान् गुरुमिति प्रागेव दूयामहे ॥

रामः । भार्गव ज्ञायते मामनुकम्पस इति ।

जाम । अरे किमुत ज्ञातोऽसि ।

अस्रुताध्मातजीमूतस्निग्धसंहननस्य ते ।
कुठारः कम्बुकण्ठस्य कष्टं कण्ठे पतिष्यति ॥

रामः । सत्यमेव करुणया प्रतिक्षिप्तोऽसि ।

जाम । आः मय्येव भ्रुकुटीधरः संवृत्तः। अरे क्षत्रियडिम्भ त्वं किल शिशु र्नववधूटिकापरिग्रह इत्यपूर्वमुपतप्यतेऽस्माभिः ।
सुप्रसिद्धः प्रवादोऽयमितिहेति च गीयते ।
जामदग्न्यः स्वयं रामो मातुर्मुद्धानमाच्छिनत् ॥

अपिच रे मूढ
उत्कृत्योत्कृत्य गर्भानपि शकलयतः क्षत्रसन्तानरोषा
दुद्दामस्यैकविंशत्यवधि विधमतः सर्वतो राजवंश्यान् ।
पित्र्यं तद्रक्तपूर्ण ह्रदसवनमहानन्दमन्दायमानं
क्रोधाग्निं कुर्वतो मे न खलु न विदितःसर्वभूतैः स्वभावः ॥

रामः । नृशंसता हि नाम तत्र पुरुषदोषः का तत्र विकत्थना ।

जाम । आः क्षत्रियवटो अति नाम प्रगल्भसे ।
प्रहर नमतु चापं प्राक्प्रहारप्रियोऽहं
मयि तु कृतनिघाते किं विदध्याः परेण ।
धिगितिविततवह्नयुद्गारभास्वत्कुठार
प्रविघटितकठोरस्कन्धबन्धः कबन्धः ॥

जनक शतानन्दौ । वत्स रामभद्र विस्रब्धं तावदास्स्व ।

रामः । कष्टमनुज्ञानापेक्षः संवृत्तोऽस्मि ।

जाम । अपि सुखमाङ्गिरस ।

शता । विशेषतस्त्वद्दर्शनात् । अपिच
त्वं नः पूज्यतमोऽतिथि र्यदि ततः सज्जातिथेया वयम् ।

जाम । पुरोधः सुचरितवृत्तः श्रोत्रियो गृहमेधी याज्ञवल्क्यशिष्यः तत्र सर्व्वं युज्यते किं तु नाहमातिथ्यकामः ।

शता । कन्यान्तःपुरमक्रमात् प्रविशता संदूषिता नः स्थितिः ।

जाम । अरण्यवासी ब्राह्मणोऽहमनभिज्ञः परमेश्वरगृहाचारस्य ।

रामः । स्वगतम् । शोभत एव दत्तभुवनैकदक्षिणस्य सामन्तेषव-हङ्कारोत्प्रासः ।

जन । पापं वाञ्छसि कर्म्म राघवशिशावस्मत्सनाथे कथम्

॥ प्रविश्य कञ्चुकी ॥

देव्यः कङ्कणमोक्षणाय मिलिता राजन् वरः प्रेष्यताम् ।

जनकशतानन्दौ । वत्स रामभद्र श्वश्रूजनस्त्वामाह्वयति तद्गम्यताम् ।

रामः । भगवन् जामदग्न्य एवमादिशन्ति गुरवः ।

जाम । को दोषः क्रियतां लोकधर्म्मः । पश्यन्तु च त्वां ज्ञातयः । किंतु न चिरं जनपदेष्वारण्यकास्तिष्ठन्ति । गन्तुकामोऽस्मि । अतो न कालः परिक्षेप्तव्यः ॥

रामः । एवम् ।

॥ प्रविश्य सुमन्त्रः ॥

भगवन्तौ वसिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः ।

इतरे । क्व भगवन्तौ ।

सुम । महाराजदशरथस्यान्तिके ।

रामः । गुरुवचनाद्गच्छामः ॥

इति निष्क्रान्ताः सर्व्वे ॥

परशुरामसंवादो नाम द्वितीयोऽङ्कः ॥

———

# तृतीयोऽङ्कः।

॥ ततः प्रविशतो वसिष्ठविश्वामित्रौ जनकशतानन्दौ च ॥

वसिष्ठविश्वामित्रौ। जामदग्न्य

इष्टापूर्त्तविधेः सपत्नशमनात्प्रेयान् मघोनः सखा
येन द्यौरिव वज्रिणा वसुमती वीरेण राजन्वती।
यस्यैते वयमग्रतः किमपरं विश्वस्य वैवस्वतः
सोऽयं त्वां तनयप्रियः परिणतो राजाऽभयं याचते ॥

तद्विरम शुष्ककलहात्। इदं त्वस्तु

संज्ञप्यते वत्सतरी सर्पिष्मन्नं च पच्यते।
श्रोत्रियः श्रोत्रियगृहानागतोऽसि जुषस्व नः ॥

जाम। अत्र वो विज्ञापयामि किन्तु क्षमे यदि रामः प्रक्षष्टवीर्य्यो न स्यात्। पश्यन्तु भवन्तः

रामःकर्म्मभिरद्भुतैः शिशुरपि ख्यातस्ततो भार्गवः
कस्मात्प्राप्य तिरस्क्रियामसहनोऽप्यस्थादिति प्रस्तुते।
को विद्याद्गुरुगौरवादिति भवेज्ज्ञाताऽपि वक्ता पुन
र्नत्वेवास्ति यथास्थितस्य सुलभद्वेषं हि वीरव्रतम् ॥

अपिच। यशसि निरवकाशं विश्वतस्त्नीयमाने
कथमपि वचनीयं प्राप्य यत्किंचिदेव।
कृतविततिरकस्मात् प्राकृतैरुत्तमानां
विरमति न कथञ्चित् कश्मला किंवदन्ती ॥

वसिष्ठः। अयि वत्स किमनया यावज्जीवमायुधपिशाचिकया। श्रोत्रियोऽसि जामदग्न्य पूतं भजस्व पन्थानमारण्यकस्यासि।

तत् प्रचिनु चित्तप्रसादनीस्वतस्रो मैत्र्यादिभावनाः (१) प्रसीदतु हि ते विशोका (२) ज्योतिष्मती (३) नाम चित्तवृत्तिः। समापयतु परशुं च। तत्प्रसादजन्मतम्भराभिधान (४) मवह्निःसाधनोपाधेय सर्वार्थसामर्थ्य मपविद्धविसवोपराग (५) मूर्ज्जस्वलमन्तर्ज्योतिषो दर्शनं प्रज्ञानमभिसंभवति। तद्व्याचरितव्यं ब्राह्मणेन तरति येन मृत्युं पाप्मानम् अन्यच्च चाभिनिविष्टोऽसि॥ पश्य

---

(१) मैत्रीकरुणामुदितोपेक्षा योगशास्त्रप्रसिद्धाश्चतस्रो भावनाः॥ सुखिषु साध्वेषां सुखमिति मैत्रीं सौहार्दं कुर्य्यात् न त्वीर्ष्यां दुःखितेषु कथं नामैषां दुःखविमुक्तिः स्यादिति करुणां कृपामेव कुर्य्यात् नौदास्यम्। पुण्यवत्सु पुण्यानुमोदनं मुदितां हर्षं कुर्य्यात् नतु द्वेषम्। अपुण्यवत्सु उपेक्षामौदासीन्यमेव भावयेत् नानुमोदनं न वा द्वेषमिति भावनाः॥

(२) सुखमयसत्त्वाभ्यासवशात् रजोगुणपरिणामरूपशोकरहिता विशोका नाम चित्तस्य स्थैर्य्यहेतुभूता प्रवृत्तिरुत्पद्यते।

(३) विशोकैव चित्तवृत्तिः ज्योतिष्मती सात्त्विकप्रकाशातिशयशालिनी भवतीति योगशास्त्रप्रसिद्धम्॥

(४) तस्य चित्तस्य प्रसादात् जातं ऋतं सत्यं बिभर्त्ति कदाचिदपि विपर्य्ययज्ञानेन नाच्छाद्यते इति सत्यरूपा प्रज्ञैव ऋतम्भरा नाम चित्तवृत्तिः॥

(५) अपविद्धविपसवोपरागं विगतविपर्य्ययप्रवृत्तिसम्बन्धं तथाच हृत्पद्मसम्पुटमध्ये प्रशान्तकल्लोलक्षीरोदधिप्रख्यं चित्तसत्त्वं भावयतः प्रज्ञानोदयात् सर्व्वप्रवृत्तिपरिचये चित्तस्य स्थैर्य्य मुत्पद्यते अवह्निःसाधनोपाधेयेत्यादिना सर्व्वप्रवृत्तिपरिचयोऽभिहितः॥

परिषदियमृषीणामेष वृद्धो युधाजित्
सह नृपतिरमात्यै र्लोमपादश्च वृद्धः।
अयमविरतयज्ञो ब्रह्मवादी पुराणः
प्रभुरपि जनकानामङ्ग भो याचकस्ते॥

जाम। एवमेतत्। किन्तु
शत्रुमूलमनुत्खाय न पुनर्द्रष्टुमुत्सहे।
त्र्यम्बकं देवमाचार्य्यमाचार्य्यानीं च पार्व्वतीम्।

विश्वा। यदि गुरुष्वनुरुद्ध्यसे चिन्तयस्व मामपि ततः।

किञ्च। हिरण्यगर्भाद्दृषयो बभूबुर्वसिष्ठभृग्वङ्गिरसस्त्रयो ये।
सोऽयं वसिष्ठो भृगुनन्दनस्त्वमयं हि तस्याङ्गिरसः प्रपौत्रः॥

जाम। प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात्।
नत्वेवं दूषयिष्यामि शस्त्रग्रहमहाव्रतम्।

तथाहि। यतो विमुक्तेरपि (१) मानरक्षणम्
प्रियं निसर्गेण तथाच पश्य मे।
सनाभयो यूयमयञ्च कर्कशः
शरासनज्याकिणलाञ्छनो भुजः।

विश्वा। स्वगतम्।
संपूजितं हि माहात्म्यमुद्गिरन्त्यः पदेपदे।
अपि मर्म्माविधो वाचः सत्यं विस्मापयन्ति माम्॥

जाम। अपिच भगवन् कुशिकनन्दन
ब्रह्मैकतानमनसो हि वसिष्ठमिश्रा
स्त्वं ब्रूहि वीरचरितेषु गुरुः पुराणः।
वंशे विशुद्धिमति येन भृगोर्जनित्वा
शस्त्रं गृहीतमथ तस्य यदत्र युक्तम्॥

वसि। स्वगतम्।

(१) विमुक्तिं मोक्षमपेक्ष्याऽपि।

कामं गुणै र्महानेष प्रकृत्या पुनरासुरः।
उत्कर्षात् सर्व्वतोवृत्तेः सर्व्वाकारं हि दृष्यति॥

विश्वा। वत्स एतद्ब्रवीमि
एकव्यक्त्यपराधकोपविकृतस्त्वं क्षत्रजातेरपि
प्रागाधाननिरन्वयप्रमथनादुच्छेदमेवाकरोः।
त्रिःसप्तावधि विप्रमुक्तजमपि (१) क्षत्रं तदेवोद्धरन्
वृद्धैः स्वैश्च्यवनादिभिर्नियमितः क्रोधाद्यरंसीरिति॥

जाम। व्यरंसिषमेव पितृवधप्रयुक्तात् क्षत्रवधमहाधिकारात् किमत्र निह्नवः।
परशुरशनिखण्डः क्षत्रघातं विहाय
प्रियमपि समिदिध्मब्रश्चनः किं न जातः।
निभृतविशिखदंष्ट्रश्चापदण्डोऽपि धत्ते
विगलितविषवह्नेः साम्यमाशीविषस्य॥
एवं मया नियमितश्च्यवनादिवाक्यैः
कोपानलस्य परशुश्च पुनर्यथा तैः।
कालेन पार्थिवकुलैः ककुभो महद्भि
र्दग्धोत्थितैरिव वनैर्गहनाःक्रियन्ते॥
निमित्तान्तरात्तु, शीर्षच्छेद्यो राम इति। अथेदानीम्

---

(१) एवमुच्चावचैरस्त्रैर्भार्गवेण महात्मना। त्रिःसप्तकृत्वः पृथिवी कृता निःक्षत्रिया पुरा। एवं निःक्षत्रिये लोके कृते तेन महर्षिणा। उत्पादितान्यपत्यानि ब्राह्मणै र्वेदपारगैः। पाणिग्राहस्य तनय इति वेदेषु निश्चितम्। धर्म्मं मनसि संस्थाप्य ब्राह्मणांस्ताः समभ्ययुः। लोकेऽप्याचरितो दृष्टः क्षत्रियाणां पुनर्भवः। ततःपुनःसमुदितं क्षत्रं समभवत्तदेतिमहाभारते आदिपर्व्वणि।

एतस्य राघवशिशोः कृतचापलस्य
लूत्वा शिरो मयि वनाय पुनः प्रयाते ।
स्वस्त्याशिराय रघवो जनकाश्च सन्तु
मा भूत् पुनर्वत कथञ्चिदतिप्रसङ्गः ॥

शता । शक्तिरस्ति कस्यचिद्विदेहराजस्य राजर्षेर्याज्यस्य मे श्रेयस्छायामप्यवस्कन्दितुम् किमङ्ग जामातरम् ।

वयमिह यथा गृह्यो वह्निस्तथैव चिरं स्थिताः
सुचरितगुरुस्तम्भाधारे गृहे गृहमेधिनः ।
यदि परिभवस्तत्रान्यस्मादुपैति धिगस्तु नः
प्रियमपि ततो धिग् ब्राह्मण्यं धिगङ्गिरसः कुलम् ॥

विश्वा । साधु वत्स गौतम साधु । कृतकृत्य एव राजा सीरध्वजस्त्वया पुरोहितेन ।

न तस्य राज्यं व्यथते न भ्रश्यति न जीर्य्यति ।
त्वं विद्वान् ब्राह्मणो यस्य राष्ट्रगोपः पुरोहितः ॥

जाम । गौतम त्वयेव बहुभिः क्षत्रियपुरोहितैः ब्रह्मतेजसा प्रस्फुरित मासीत् । किन्तु प्राकृतानि तेजांस्यप्राकृते ज्योतिषि प्रशाम्यन्ति ॥

शता । सक्रोधम् । अरे अनड्वन् निरपराधराजकुलकदन महापातकिन् अशिष्टविकृतचेष्ट बीभत्सकर्म्मन् अपूर्व्वपाषण्ड काण्डीर काण्डपृष्ठ कथमस्यामपि दिशि प्रगल्भसे ननु च रे त्वमसि किंन्ब्राह्मण एव । अहो महा ब्राह्मणस्याचारः ।

मातुरेव शिरश्छेदो गर्भाणां चापकर्त्तनम् ।
राज्ञां च सवनस्थानां ब्रह्महत्यासमो वधः ॥

जाम । आः स्वस्तिवाचनिक दुष्ट दुष्ट सामन्तपुरोहित अपि च रे अहल्यायाः पुत्र अहं तव काण्डपृष्ठः ।

शता । आः दुष्ट दुर्मुख भृगुप्रसवपांशन

राजानो गुरवश्चैते महिम्नैव महाक्षमाः।
क्षमन्तां नाम नत्वेवं शतानन्दः क्षमिष्यते ॥

॥ इति कमण्डलूदकेनोपस्पृशति ॥

वसि। कः कोऽत्र भोः प्रसाद्यतां प्रसाद्यताम्। अयं धविचनिर्द्धूत इवाग्निः प्रणीतपृषदाज्याभिघारघोरस्तनूनपात्समिध्यमान दारुणब्रह्मवर्चसज्योतिराङ्गिरसः।

शता। ससंरम्भम्। शापोदकं गृहीत्वा। भोः भोः सभासदः पश्यन्तु भवन्तः।

सक्रोधः प्रसभमहं पराभिघाता
दुद्धतं द्रुततरमाततायिनं वः।
उत्पातक्षुभितमरुद्विघट्टमानो
वज्राग्निर्द्रुममिव भस्मसात् करोमि ॥

॥ नेपथ्ये ॥

प्रसीद भगवन् गृहानुपगते प्रशाम्यतु दुरासदं तपस्तेजः।

श्लाघ्यो गुणैर्द्विजवरस्य निजस्य बन्धु
स्तस्मिन् गृहानुपगते सदृशं किमेतत् ॥
विद्वानपि प्रचलितस्तु यदेष मार्गात्
क्षन्तं हि तत्र विजयाय शमं भज त्वम् ॥

वसि। शापोदकमपहरन्। वत्स शतानन्द यथाह सम्बन्धी महाराजदशरथः। अन्यच्च

यत् कल्याणं किमपि मनसा तदयं वर्त्तयाम
स्त्वं जावालिप्रभृतिसहितः शान्तिमध्यग्नि कुर्याः।

जेतुं जैत्रानथ खलु जपन् सूक्तसामानुवाकान् (१)
नस्मच्छिष्यैः सह स भगवान् वामदेवो गृणातु ॥

॥ परिष्वज्य निष्क्रामयति ॥

जाम। पश्यत वटोः क्षत्रियावष्टब्धस्य गर्ज्जितानि तत् किमनेन भो भोः कोसलेश्वरविदेहप्रसादोपजीविनो ब्राह्मणाः सप्तकुलपर्व्वतद्वीपगोचराश्च सर्व्वक्षत्रियाः वदामः

तपो वा शस्त्रं वा व्यपदिशति यः कश्चिदिह वः
स दर्पादुद्दामद्विषमसहमानः कलयतु।
अरामां निःसीरध्वजदशरथीकृत्य जगतीं
मदप्रस्तत्कुल्यानपि परशुरामः शमयति॥

॥ नेपथ्ये ॥

भार्गव भार्गव। अति हि नामावलिप्यसे।

जाम। असूयति नामायमस्मदवलेपाय जनकः संरब्धश्च।

प्रविश्य जनकः।

शत्रुध्वंसात् परिणतिवशादृग्यजुस्तन्त्रप्रधाने
नैरन्तर्य्यादथ च परमब्रह्मतत्त्वोपलम्भात्।
क्षात्रं तेजो विजयि सहजं यद्प्रसीदिदं तत्
प्रत्युद्भूय त्वरयति पुनः कर्म्मणे कार्म्मुकं नः॥

जाम। भो जनक
त्वं ब्रह्मण्यः किल परिणतश्चासि धर्म्मेण युक्त
स्त्वां वेदान्तेषु चरम ऋषिः सूर्य्यशिष्यः (२) शशास।

---

(१) यत्रार्थवशेन पादव्यवस्था सा ऋक्। ऋक्समुदायः सूक्तम्। गानाश्रिता ऋक् साम। सूक्तसमुदायोऽनुवाको वेदभागविशेषः॥

(२) याज्ञवल्क्यः॥

इत्याचारादसि यदि मया प्रश्रयेणोपजुष्ट

स्तत् किं रोषादविदितभयं कर्कशानि ब्रवीषि ॥

जन । अन्तर्भेदनं क्रियते प्रश्रयस्येति शृणुत भोः सभासदः ।

भृगोर्वंशे जातस्तपसि च किलायं स्थित इति

द्विषत्यप्यस्माभिश्चिरमिह तितिक्षैव हि कृता ।

यदा भूयोभूयस्तृणवदवधू नोत्यनिभृत

स्तदा विप्रेऽप्यस्मिन् नमतु धनुरन्यास्ति न गतिः ।

जाम । सरोषहासाक्षेपम् । किमात्थ भोः किमात्थ धनुरिति आश्चर्यम्

चचालोकक्षुभितहुतभुक् प्रस्फुलिङ्गाट्टहासं

हास्यं पश्यन्नपि रिपुशिरःशाणशातं कुठारम् ।

दत्तोत्सेकः प्रलपति मया याज्ञवल्क्यानुरोधा

न्मिथ्याध्मातः किमपि जरसा जर्जरः क्षत्रबन्धुः ॥

जन । सावेगम् । किमत्र बहुना

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र

मुद्गारिघोरघनघर्घरघोषमेतत् ।

ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र

जृम्भाविडम्बिविकटोदरमस्तु चापम् ॥

इति धनुरारोपयति ॥

॥ नेपथ्ये ॥

विरम नरपते कथं द्विजेऽस्मि

न्नविरतयज्ञवितीर्णगोसहस्रः ।

तव पलितनिरन्तरः पृषत्कं

स्पृशति पुराणधनुर्द्धरस्य पाणिः ॥

जन । सखे महाराज दशरथ

अस्मानधिक्षिपतु नाम न किञ्चिदेतत्
कस्य द्विजे परुषवादिनि चित्तभेदः ।
वत्सस्य मङ्गलविरुद्धमयं तु पापः
कर्णे रटन् कटु कथं नु वटुर्विषह्यः ॥

जाम । आः दुरात्मन् क्षत्रियापसद वटुरित्यधिक्षिपसि ।
उत्तिष्ठोत्तिष्ठ यावद्विशकलितयकृत्क्लोमवक्षोरुहान्त्र
स्नायुग्रन्थ्यस्थिशुक्रव्यतिकरितजरत्कन्धरादन्तकण्ठः ।
मूर्द्धच्छेदादुदञ्चद्गलधमनिशिरारक्तडिण्डीरपिण्डः
प्रायः प्राग्भारघोरं पशुमिव परशुः पर्व्वश स्त्वां शृणातु ॥

प्रविश्यान्तरे दशरथः ।

भो भार्गव भो भार्गव

एष नो नरपतिर्यथा स्थितस्त्वं शरीरमपि न स्थितं तथा ।
तच्च वाक्परिभवैः कृतैर्वयं सर्व्वथैव ननु दुःखमास्महे ॥

जाम । ततः किम् ।

दश । ततश्च न क्षम्यते ।

जाम । त्वमप्यपरः प्रभविष्णुरिव मामवस्कन्दयसि ।
चेतयस्व नित्यनिरवग्रहःप्रकृत्यैव रामोऽस्मि जामदग्न्यः ।
क्षत्रियश्च भवान् ।

दश । अतः खलु नोपेक्ष्यसे ।
दुर्दान्तानां दमनविधयः क्षत्रियेष्वायतन्ते
दुर्दान्तस्त्वं वयमपि च ते क्षत्रियाः शासितारः ।
सद्यः शान्तो भव किमपरं दम्यसे सोऽधुनैव
क्व ब्रह्माणः प्रशमनपराः क्वच धार्य्यं क्व चास्त्रम् ॥

जाम । विहस्य । चिरस्य खलु कालस्य जामदग्न्यः सनाथो वर्त्तते
यस्य यूयं क्षत्रिया राजानो विनेतारः ।

दश। अरे किमत्र काचिद्भ्रान्तिः।
अज्ञोवा यदि वा विपर्य्ययगतो ज्ञानेऽथ सन्देहभृद्
दृष्टादृष्टविरोधि कर्म्म कुरुते यस्तस्य गोप्ता गुरुः।
निःसन्देहविपर्य्यये सति पुनर्ज्ञाने विरुद्धक्रियं
राजा चेत् पुरुषं न शास्ति तदयं प्राप्तः प्रजाविप्लवः॥

विश्वा। युक्तमाह भो महाराजः।
अनुत्पन्नं ज्ञानं यदि यदि च सन्देहविधुरं
विपर्य्यस्तं वा स्यात् परिचर वसिष्ठस्य चरणौ।
ध्रुवं ज्ञाने दोषः कथमपरथा दुर्व्यवहृति
र्विशुद्धौ चेत् पापं चरसि न सहन्ते नृपतयः।

जाम। धर्म्मे ब्रह्मणि कार्म्मुके च भगवानीशो हि मे शासिता
सर्व्वत्त्वचनिवर्हणस्य विनयं कुर्य्युः कथं त्वचियाः।
सम्बन्धस्तु वसिष्ठमिश्रविषये मान्यो जरायां ननु
सर्द्धायामधिकः समस्त तपसा ज्ञानेन चान्योऽस्ति मे।

वसि। भृगुप्रसवात् पराजय इति प्रियं नः। किंनु खलु
अस्माभिरेव पाल्यस्य प्रशस्तत्वात् प्रियस्य नः।
असह्यं हि पुराणस्य पश्चाचारस्य विप्लवम्॥

जनकदशरथविश्वामित्राः। अनार्य्य निर्म्मर्य्याद।
जगत् सनातनगुरौ वसिष्ठेऽपि निरङ्कुशः।
व्यालद्विप इवास्माभिरक्रम्यैव दम्यसे॥

जाम। एवमवधूतोऽस्मि।
अन्तर्धैर्य्यभरेण वृद्धवचनात् संपीड्य पिण्डीकृतो
हृन्मर्म्माश्रितशल्यवत् परिदहन् मन्युश्चिरं यः स्थितः।
स्फूर्जत्येव स एष सम्प्रति मम न्यक्कारभिन्नस्थितेः
कल्पापायमरुत्प्रकीर्णपयसः सिन्धोरिवौर्व्वानलः॥

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000052

दिष्ट्या । निकारः प्राप्तोऽयं ज्वलति परशु मन्युरिव मे
पृथिव्यां राजानो दशरथवले सन्त्यु पहिताः ।
पुनर्दाविंशोऽपि प्रकुपितकृतान्तोत्सवकर
श्चिरात् चत्रस्यास्तु प्रलय इव घोरः परिसरः ॥
वसि । कष्टं भोः कष्टम् ।
कामं हि नः स्वजन एष तथापि दर्पाद्
घोरं व्यवस्यति कथं नु भवेदवध्यः ।
संदूषितेन च मया मुञ्जरीचितश्चेद्
वत्सस्य भार्गवशिशोर्दुरितं हि तत् स्यात् ॥
विश्वा । अब्रह्मवर्चसमिवाभ्रस्यशस्त्रसामर्थ्यमरे जामदग्न्य मन्यसे।
ब्रह्मचत्रसमाजमाचिपसि यदत्से च घोराशय
स्तेनातिक्रमणेन दुःखयसि नः पाल्योऽसि सम्बन्धतः ।
अन्तरत्वां प्रति कोपनस्य तरलः शापोदकं दचिणः
प्राक्संस्कारवशेन चापमितरः पाणिर्ममान्विष्यति ॥
जाम । ननुभोः कौशिक
त्वं ब्रह्मवर्चसधरो यदि वर्त्तमानो
यद्वा स्वजातिसमयेन धनुर्द्धरः स्याः ।
उग्रेण भोस्तव तपस्तपसा दहामि
पचान्तरे तु सदृशं परशुः करोतु ॥

॥ नेपथ्ये ॥

अयमहं भोः कौशिकान्तेवासी रामः प्रणम्य विज्ञापयामि ।
पौलस्त्यविजयोद्दामकार्त्तवीर्य्यार्जुनद्विषम् ।
जेतारं कार्त्तिकेयस्य विजयेयं नमोऽस्तु वः ॥
दश । प्राप्तो रामभद्रः । कथंनु नामैतत् ॥

जन। हन्त भोः प्रशस्तमभ्यनुजानीत। विजयतां रामभद्रः।
अयंविनेता हप्तानामिष वीरोजगत्पतिः।
वयं वसिष्ठधौरेयाः सर्व्वे प्रतिभुवोऽत्र वः।

दश। नन्वद्यैव प्रथितयशसामूढरक्षाव्रतानां
याज्यानां नो गुणवति गृहे रामभद्रस्तु जातः।
ज्ञानज्योतिःपरिगतभवद्भूतभव्याः प्रभावं
यद्ब्रह्माणः कमपि शिशुकेऽप्यत्र संवेदयन्ते॥

जाम। एहि मन्ये राजपुत्र जामदग्न्यं विजेष्यसे।
सस्मितम्। नहि विजेष्यसे। दुर्दमोहि रेणुकानन्दन
स्तुदन्तकः। तथाहि सम्प्रति
क्षत्त्रचत्रियकण्ठकन्दरसरत्कीलालनिर्वापित
प्रत्यङ्गूतशिखाकरालकृतभुग्भाङ्कारिभिर्मार्गणैः।
एतद्दस्मरकालरुद्रकवलव्यापारमभ्यस्यतु
ब्रह्मस्तम्बनिकुञ्जपुञ्जितघनज्याघोषघोरं धनुः॥

॥ इति निष्क्रान्ताः सर्व्वे ॥

॥ संहृष्टो नाम तृतीयोऽङ्कः ॥

---

॥ नेपथ्ये ॥

भो भो वैमानिकाः प्रवर्त्तयन्तां प्रवर्त्तयन्तां मङ्गलानि।
कृशाश्वान्तेवासी जयति भगवान् कौशिकमुनिः
सहस्रांशोर्वंशे जगति जयति चत्रमधुना।
विनेता चत्रारेर्जगदभयदानव्रतधरः
शरण्यो लोकानां दिनकरकुलेन्दुर्विजयते॥
ततः प्रविशतः संभ्रान्तौ विमानेन शूर्पणखामाल्यवन्तौ।

माल्य। वत्से हष्टस्त्वया दिवौकसामेकायनीभावः यदिन्द्रादयः
स्वतो वन्दित्वमुपगताः।

शूर्प। एहि तुह्मेहिं णिरूविदं बिसंबदइ। संपदं च उक्कम्पिदह्मि। ता किं एत्थ करणिज्जं।

माल्य। यासौ राज्ञा दशरथेन प्राक्प्रतिश्रुतवरदया राज्ञी भरतमाता कैकेयी तस्या मन्थरा नाम परिचारिका दशरथस्य वार्त्ताहारिणी मिथिलामयोध्यायाः संप्रेषिता मिथिलोपकण्ठे वर्त्तते इति संप्रत्येव मे निवेदितं चारकैः। तस्यास्त्वया शरीरमाविश्य एवमेवं च कर्त्तव्यम्। इति कर्णे कथयति।

शूर्प। किमधस्सो करिस्सदि एव्वं णामे त्ति।

माल्य। भिद्येत नो सद्वृत्तमिक्ष्वाकुगृहेषु विशेषतस्ताटशस्य विजिगीषोः।

शूर्प। तदो किं।

माल्य। ततो ऽनेन योगाचारन्यायेन सुदूरमाकृष्य रक्षसामन्तिकमुपनीतस्य विन्ध्यकान्तारेषूद्देशज्ञस्य विचरतः सुकराण्येव स्कन्दनानि स्युः विराधदनुकवन्धप्रभृतयोहि दण्डकारण्यसचिषु तीक्ष्णास्त्वरिष्यन्ति। शक्या हि लुप्तप्रभुशक्तेरुत्साहशक्तिश्छद्मनाभिसन्धातुम्। अनिवर्त्तनीयश्च रावणस्य सीतास्वीकारग्रहः। स चैवमीषत्करः सप्रयोजनश्चेति॥

शूर्प। अह लक्खणसहाअत्तणे किं पि पञोअणं॥

माल्य। वीरोऽस्त्रपारगश्चिन्त्यो यथा राम स्तथैव सः।
छद्मदण्डप्रयोगस्तु यथैकस्मिंस्तथा द्वयोः॥

शूर्प। मम दुट्ठिअं एव्व एदं ण जुत्तं पडिभादि। जं च दूरट्ठिदस्स दासरहिणो सस्सिधाणकरणं जं च अणावड्ढवेरस्स अप्पडिसमाधेअं इत्थिआवेरं त्ति।

माल्य। तावत् भूम्यानन्तर्यतः प्रत्यासन्नएव सानुचरसुन्दोपसुन्दपुत्रोपमर्द्दकस्ताटकारिः कथमनाबद्धवैरः अप्रतिविधेयश्च रामरावणयोरितथापि वैरम्।

माल्य। पाल्यं तस्य जगद्दयं तु जगतो नित्यं हठादेशिनः
सामैवं सति कीदृगप्रियहता शश्वद्विरुद्धात्मना।
कानर्थान् रघुनन्दनो भ्रगयते देवैः पतिर्यो हत
स्तत्साद्दानमपीह नास्ति न भिदा तस्यैषवः साधनम्॥
न दण्डे ऽप्यधिके शचौ न प्रकाशः प्रकाशते।
तूष्णीं दण्डस्तु कर्त्तव्यस्तस्य चायमुपक्रमः॥
तथा सति सीतापहारतः किमपरं कुर्य्यात्। किं च॥
हृतजानिररातिभिः सलज्जो
यदि वत्योः शरणं गतोऽन्यथापि।
व्यदितोऽस्त एव निष्प्रतापः
परितप्याप्यथवा घटेत सन्धौ॥
उत्तिष्ठेत वधाय नः परिभवप्रौढेन चेन्मन्युना
नेष्टे तत्प्रसरं निरोद्धुमुदधि क्लिष्टांशुवीर्य्योऽपि सः।
किन्तु प्राक्प्रतिपन्नरावणसुहृद्भावेन भीमौजसा
शत्रुर्वज्रधरात्मजेन (१) हरिणा घोरेण घानिष्यते॥
अनेन च प्रसङ्गेन बहनुसन्धातव्यम्।

शूर्प। किं विय।

माल्य। रावणप्रियासि वत्से कार्य्यज्ञा च यतो निःशङ्कमावेद्यते हृदयखेदः।
चितेरानन्तर्य्यादपकृदपकृत्यस्य सततं
द्विधा रामः शत्रुः प्रकृतिनियतः चत्रिय इति।
तृतीयोऽमे नप्ता रजनिचरनाथस्य सहजो
रिपुःप्रत्यासत्ते रहिरिव भयं नो जनयति॥

---

(१) वज्रधरात्मजो वाली॥

कुम्भकर्णस्तु सन्नप्यसत्समः स्वापव्यसनादविनयाच्च। विभीषण स्त्वागामिकात्मगुणसम्पन्न इत्यनुरक्ताः प्रकृतयः। खरदूषण त्रिशिरसस्तु कुलसदृशवृत्तयो राजानमुपतिष्ठन्ते यतस्ते वत्सेनेव धेनूं राजानमर्थान् दुहन्ति। उपजापिताश्च प्रति जपन्ति प्रकृतयः। तदिदमन्तर्भेदजर्ज्जरं राजकुलमभियुक्त मात्रं रामेण भिद्यते। यथोक्तं लघ्वपि व्यसनपद मभियुक्तस्य न कृच्छ्रसाध्यं भवतीति। तत्र च विभीषणावग्रहतः प्रतिविधा नम्। स तु प्रकाशदण्डस्तुष्णीं दण्डः संरोधनमपसारणं वा स्यात्। तत्र प्रकाशदण्डमभिन्नसम्बन्धाः कथं राक्षसास्तिति क्षेरन्। तुष्णीं दण्डोऽपि प्राज्ञैरनुमीयमानः प्रकृतिकोपके रामेऽभियोक्तरि दुरन्तः स्यात्।

संरोधने त्वभिभवाद्विहिते तदेक
मैत्र्या खरप्रभृतयश्च तदा विकुर्य्युः।
निर्वास्यमानमपि तं परिवारयेयु
स्तस्मात् खरप्रभृतयः पुरतो विचिन्त्याः॥

तत्र रामस्योपयोग इति।

शूर्प। अहो अणुजीवित्तणस्स अगरुअदा। जं रावणस्स खरप्पमुहाणं च तुम्हे बि कुलसम्बन्धे एव्वं मादामहो चिन्तेदि।

माल्य। ईदृशः कुलपुत्रकाचारः।

शूर्प। बिणा खरप्पमुहेहिं बिभीषणस्स का पडिबत्ती।

माल्य। प्राज्ञः खल्वसा वुत्प्रेक्षितविकारः स्वयमेवापसर्पेत। उपेक्षणीयश्चास्माभिर्नचैतन्मन्तव्य मौरसं भयमिति।

यतः। बाल्यात् प्रभृत्येव विरूढसख्यः
सुग्रीवमेष ध्रुवमाश्रयेत।
बालिप्रसादीकृतभूमिभागे
कुमारभक्तौ स्थितमृष्यमूके॥

ततश्च वालिना यतिष्यते न रामोपश्रयेण। रामोपश्लेषणेन वा नोपेक्षित वाली।

शूर्प। अध रामो परसुरामबिजइ जणिदबिरोधं वालिणं बाबादेदि तदो बिभीषणरामसंजोओ अणत्थो त्ति संभाबेमि।

माल्य। ननु वत्से

यो वालिनं हन्ति हता वयं स्म
स्तेन ध्रुवं तत्र तु सर्व्वनाशे।
एकः स जीव्यात् कुलतन्तुरस्मै
रामः श्रियं धर्म्ममयो ददातु॥

शूर्प। सास्रम्। एव्वंबि दाब होदु।

माल्य। गम्यतामिदानीं वत्से यत्र प्रेषितासि। सुकरं चैतत् प्रयोजनं यदा जनकदशरथान्तिके वसिष्ठविश्वामित्रौ न स्याताम्। अहमपि लङ्कामेव गच्छामि।

शूर्प। हा अम्ब तुए बि दुक्खं पेक्खिदब्बं।

माल्य। हा वत्साः खरदूषणप्रभृतयो वध्याः स्थ पापस्य मे
हा हा वत्स विभीषण त्वमपि मे कार्य्येण हेयः स्थितः।
हा मद्वत्सल वत्स रावण महत् पश्यामि ते सङ्कटं
वत्से कैकसि (१) हा हतासि न चिरात् त्वीन् पुत्रकान्द्रक्ष्यसि॥

इति निष्क्रान्तौ।

॥ विष्कम्भकः ॥

ततः प्रविशतो वसिष्ठविश्वामित्राभ्यां सह जनकदशरथौ। राजानावन्योन्यं परिष्वज्य।

जन। राजन् दिष्ट्या वर्द्धसे यदीदृशस्ते वत्सो रामभद्रः।

---

(१) कैकसी खरादिमाता।

अप्राकृतानि च गुणैश्च निरन्तराणि
लोकोत्तराणि च फलैश्च महोदयानि ।
वीरस्य यस्य महतश्चरिताद्भुतानि
नास्माकमेव जगतामपि मङ्गलानि ॥

वसिष्ठः । विश्वामित्रं परिष्वज्य । सखे कुशिकनन्दन
अस्माभिरप्यनाशास्यो रामस्य महिमान्वयः ।
यत् कृतास्तेन कृतिनो वयञ्च भुवनानि च ॥

विश्वा । प्रकृष्टपुण्यपरिपाकोपादान एष महिमा । के वयमेता-
वतः प्रहर्षस्य ।

दश । भगवन् कुशिकनन्दन मा मैवम् ।
आदित्याः कुलदेवतामिव नृपाः पूर्व्वे दिलीपादय
स्तेजोराशि मरुन्धतीपतिमृषिं भक्त्या यदाशिश्रियन् ।
पाकश्लाघ्यतराश्च भूरितपसां सत्याशिषामाशिष
स्तासामप्ययमेव मङ्गलविधिर्यन्नः प्रसन्नो भवान् ॥

वसि । सत्यमीदृशो विश्वामित्रः ।
यद्वाचां विषयमतीत्य चेतसां वा
पर्य्यायात् परमतिशायनस्य वा यत् ।
ब्रह्मर्षौ तदिह दुरासदे समिद्धं
तेजोभिर्ज्वलति महत्तपोऽप्रमेयम् ॥

विश्वा । भगवन् मैत्रावरुण
सनत्कुमाराङ्गिरसौ गुरुविद्यातपोमयौ ।
स्तौषि चेत् सत्यएवास्मि सत्यसन्धा हि ते गिरः ॥
रामभद्रे तु नाश्चर्य्यमेतत् महाराजदशरथो हि तस्य प्रसविता ।
साक्षात्पुण्यसमुच्चयादिव मनोर्वैवस्वतस्यान्वये
राजानस्त्वदपेक्षितेन विधिना गोपायितारः प्रजाः ।

ये भूताः प्रथमे पवित्रचरिता स्तेषामयं धूर्द्धरो
वीरः क्षत्रियपुङ्गवो गुणनिधिः स्ताघिष्ठा धरित्र्याः पतिः ॥

अपिच। अरिष्टस्त्वाष्ट्रस्य (१) प्रशमनविधौ जम्भदमनः
स विश्वे षामीशः पतिरपि निकायस्य मरुताम् ॥
विजेतारं सेनाः सततमपहन्तारमसुरा
नमुं वीरं वव्रे वज्ञषु समनीकेषु मघवा ॥
सोऽयमीदृशः कथमनीदृशं प्रसूते। कथमचाश्चर्य्यं नाम।
मरुत्वन्तं देवं यदुह भगवन्तं विजयते
विजिग्ये तं राजा युधि दशमुखं हैहयपतिः।
निहन्तारं तस्य प्रथितमहिमानं त्रिभुवने
महावीरं जित्वा किमिव हि न वत्सेन विजितम् ॥

दश। तत् किमित्ययं द्विधा भिद्यते लोकः।

विश्वा। एष वत्सो रामभद्रः सजामदग्न्यइतएवाभिवर्त्तते। यएषः
वीरश्रिया च विजयेन च रोचमानो
मान्ये मुनावनतस्य गुणान्नतस्य।
लज्जां वहन् भृगुपतौ हृतवीर्य्यदर्पे
शिष्यो गुराविव कृतप्रथमापचारः ॥

॥ ततः प्रविशतो रामजामदग्न्यौ ॥

रामः। यद्ब्रह्मवादिभिरुपासितवन्द्यपादे
विद्यातपोव्रतनिधौ तपतां वरिष्ठे।
दैवात् कृतस्त्वयि मया विनयापराध
स्तत्रं प्रसीद भगवन्नयमञ्जलिस्ते ॥

जाम। अपराद्धं वत्स त्वया जामदग्न्यस्य नोपकृतम्। (२)

(१) वृत्रस्य। जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः।
वृत्रइत्यभिविख्यातो ज्ञानविज्ञानसंयुतः। भागवते ३ स्कन्धे।
(२) जामदग्न्यस्य नापराद्धं किन्तूपकृतमित्यन्वयः।

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000060

पुण्या ब्राह्मणजातिरन्वयगुणः शास्त्रं चरित्रं च मे
येनैकेन हतान्यमूनि हरता चैतन्यमात्मामपि।
एकः सन्नपि भूरिदोषगहनं सोऽयं त्वया प्रेयसा
वत्स ब्राह्मणवत्सलेन शमितः क्षेमाय दर्पामयः॥

रामः। कथं नापराद्धं मया यदायुधपरिग्रहं यावदारूढो दुर्य्योगः।

जाम। एष वो न्यायः।

असाध्यमन्यथा दोषं परिच्छिद्य शरीरिणाम्।
यथा वैद्यस्तथा राजा शस्त्रपाणिर्विषह्यति॥

रामः। कोऽहमुक्तिप्रत्युक्तिकायां भगवतः। तस्मादितइतोभगवन्।

जाम। क्व पुनर्वत्स मया गन्तव्यम्।

रामः। यत्र तातस्य तातजनकस्य। अथवा शान्तम्। उत यत्र भगवन्तौ मैत्रावरुणकौशिकौ।

जाम। इदमिदानीमशक्यम्। अनतिक्रमणीयस्य राजनिर्देशः।

॥ परिक्रम्य द्वे भगवन्तौ ॥

सएष रामः सौम्यत्वादचण्डश्चण्डविक्रमः।
यस्य प्रतिष्ठितं जैत्रं जामदग्न्येऽपि शासनम्॥

राजानौ। अतिगम्भीरः सौजन्योद्गारः।

रामः। एष वो रामशिरसा प्रणामपर्य्यायः।

सर्व्वे। एह्येहि वत्स। इति परिष्वजन्ते।

जाम। भगवन् मैत्रावरुण एष जमदग्निपुत्रः प्रणम्य कौशिकेन सार्द्धमत्रभवता विज्ञापयामि।

त्वद्वातिक्रमसंभृतस्य महतोनिर्स्सिक्तये पाप्मनः
प्रायश्चितनमादिशन्तु गुरवो रामेण दान्तस्य मे।
प्राग्धर्म्मस्य भवन्त एव परमं द्रष्टार आसन् गुरो
र्लब्ध्वा ज्ञानमनेकधा प्रवचनैर्मन्वादयः प्राणयन्॥

वसि। अनघः श्रोत्रियाणां गृहे जातोऽसि।

दुर्विनीते त्वयि वयं दुःखिताः सुखिनोऽन्यथा।
निसर्गो ह्येष वृद्धानां यत्तु श्रेयस्तथैव तत्॥

तत् परिपूत एवासि।

विश्वा। अपहतं ते विघ्नः पाप्मानं रामभद्रेण। यतः प्रायश्चित्त मिव राजदण्डमप्येनसो निष्क्रय मामनन्ति धर्म्माचार्य्याः। किं पुनरत्र भगवान् वसिष्ठः प्रजापालसंनिधौ प्रशास्ति।

रामः। एतानि तानि साक्षात्कृतधर्म्मणामृषीणां प्रसन्नगम्भीर पावनानि वचनानि।

दश। भगवन् जामदग्न्य

निसर्गतः पवित्रस्य किमन्यत् पावनं तव।
तीर्थोदकञ्च वह्निश्च नान्यतः शुद्धिमर्हतः॥

जाम। भगवति वसुन्धरे प्रसीद रन्ध्रदानेन।

जन। भगवन् यदि प्रसन्नोऽसि तदिस्त्रब्धोपवेशनात् परिपुनीहि गृहान् एतत् पूतमासनं भगवतः।

जाम। यदभिरुचितं सूर्य्यशिष्यान्तेवासिने राजन्यश्रोत्रियाय।

॥ सर्व्वे उपविशन्ति ॥

दश। जनपदबहिर्निष्ठा यूयं गृहस्य परिग्रहा
द्वयमपि निर्जैर्व्यग्राः कार्य्यैस्ततान बभूव यः।
स इह भवतामद्यास्माभिर्मनोरथवाञ्छितः
सुचरितपरीपाकात् प्राप्तश्चिरस्य समागमः॥

अत्र च। का ते स्तुतिः स्तुतिपथादतिवृत्तधाम्नः
किं दीयतामविकलक्षितिदायिने च।
शान्तस्य किं परिजनेन मुने तथापि
पुत्रैः समं दशरथोऽद्य वशंवदस्ते॥

जाम। यूय मोहवशादिति किमत्राश्चर्य्यम्
प्रेद्धं धाम यदामनन्ति सुधियः सोऽयं निधिर्ज्योतिषां
देवो वः सविता कुलस्य किमतो भूत्यै प्रशंसापदम्।
यज्वानः परमार्थराजऋषयस्ते यूयमिक्ष्वाकवो
येषां वेद इवाप्रमेयमहिमा धर्म्मो वसिष्ठो गुरुः ॥
अपिच। संग्रामेष्टिसमाप्तिदं दिविषदां भर्त्तुर्धनुः साधनं
सप्तद्वीपनिविष्टयूपनिलयश्रेण्यङ्किता भूर्गृहाः।
शश्वत्कीर्त्तिनिबन्धनं भगवती भागीरथी सागरः
प्रख्यातानि च तानि तानि भवतां भूमानमातन्वते ॥
वसिष्ठविश्वामित्रौ। अपवार्य्य। एतदपि शिक्षितं वत्सेन।
जाम। रामभद्र मामनुमोदस्वारण्यगमनाय।
विश्वा। मामप्यथ भवन्तोऽनुजानन्तु।
रघुजनकगृहेषु गर्भरूपव्यतिकरमङ्गलहृद्वयोऽनुभूताः।

॥ भृगुपतिदमनेत्यर्द्धोक्ते विरम्य ॥

भृगुपतिविदितोन्नतिं च वत्सं प्रियमभिनन्द्य सुखी गृहानुपेयाम् ॥
दश। वत्स रामभद्र प्रस्थितस्ते भगवान् कौशिकः।
विश्वा। सास्रं राममालिङ्ग्य। अहमेव सौम्य त्वां न मोक्तुमुत्सहे
किं त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता।
वसि। गृहात् स्वगृहं गन्तुमागन्तुं च कामचारः।
विश्वा। भगवान् यद्यनुरुद्ध्यते तदेहि सिद्धाश्रमपदमुभौ गच्छावः।
त्वां पुरस्कृत्य गच्छन्मधुच्छन्दसो (१) मातुः सत्कार्य्यो भविष्यामि ॥
वसि। किमेतावत्यपि भवानस्मासु न प्रभवति।
राजानौ। रमणीयः पावनो ब्रह्मर्षिसङ्गमः।

---

(१) विश्वामित्रपुत्रस्य।

अन्योन्यमाहात्म्यविदोरन्यैरविदितात्मनोः ।
विराजते विरोधोऽपि (१) नाम स्नेहे तु का कथा ॥

॥ नेपथ्ये ॥

एषा रामवधूर्गुरून् वन्दते ।

ऋषयः । वत्से जानकि

वीरेण ते विनयमाङ्गलिकेन पत्या
दृप्तद्रुहः प्रशमितेषु महाभयेषु ।
वज्रप्रकाण्डगृहिणीवहुमानपूजा
मूर्ज्जस्वलामपि शची मनसा करोतु ॥

रामः । स्वगतम् । अचिरात् समूलकाषं कषितेषु राक्षसेष्वेवं स्यात् ।

ऋषयः । स्वस्त्येवमेवास्तां भवन्तः । उत्तिष्ठन्ति ।

इतरे । उत्थाय । नमो नमो वः ।

जाम । भगवन्तौ जामदग्न्यो ऽभिवादयते ।

वसिष्ठविश्वामित्रौ । स्थिरस्ते प्रशमोभूयात्प्रत्यग्ज्योतिः प्रकाशताम् ।
अच्छिन्न शिवसंकल्पमन्तःकरणमस्तु ते ।

इति निष्क्रान्तौ ।

---

(१) कामधेनुं वशिष्ठोऽसौ न तत्याज यदा मुनिः ।
ततोऽस्य शवलां राजा विश्वामित्रस्तदाहरत् । इत्युपक्रम्य
दृष्ट्वा निषूदितं सैन्यं वशिष्ठेन महात्मना ।
विश्वामित्रसुतानान्तु शतं नानाविधायुधम् ।
अभ्यधावत् सुसंक्रुद्धं वशिष्ठं जगतां वरम् ।
ऊङ्कारेणैव तान् सर्व्वान् निर्द्ददाह महामुनिः । रामायणे आ

जाम। किञ्चित् परिक्रम्य स्थित्वा च। वत्स रामभद्र इतस्तावत्।

रामः। उपसृत्य। आज्ञापय।

जाम। यन्मया क्षत्रियोच्छेदविश्रान्तेनावधारितम्।

तदेतदधुना धत्ते धनुः कारणशून्यताम्॥

इध्मादिव्रश्चनप्रयोजनमस्तु परशुः।

पुण्यानाम्घवयस्तटेषु सरितां ये दण्डकायां वने

भूयांसो निवसन्ति तेषु सततं लङ्कासदो राक्षसाः॥

विध्वंसाय चरन्ति तत्प्रमथने यस्योपयोगो भवेत्

संप्रत्येव सतामुनैव धनुषा वत्सेऽधिकारः स्थितः॥

॥ अर्पयति ॥

रामः। प्रणम्य। प्रतिगृहीतेयमाज्ञा।

जाम। सास्रं परिक्रम्य। आयुष्मन् प्रतिनिवर्त्तस्व।

॥ इति निष्क्रान्तः ॥

रामः। सबाष्पम्। गतो भगवान् भार्गवः। विचिन्त्य। तदपि नामाऽन्येन केनचिदुपायेन दण्डकारण्यानां प्रतिष्ठेयम् कथं च रामप्रियाद्गुरुजनादेवं स्यात्।

न्यस्तशस्त्रे भृगुपतौ परतन्त्रे तथा मयि।

कष्टमुत्सारिताः क्रूरैर्यातुधानैस्तपोधनाः॥

॥ नेपथ्ये ॥

आर्य्य आर्य्य। ( मध्यमायाः प्रियसखी मातुर्वो मन्थरेति या।

सा प्राप्तेयमयोध्यायास्तव राम दिदृक्षया॥ )

रामः। साधु यदिदमस्यां शिशुजनप्रवासवैमनस्यं विच्छिद्येत। तद्वत्स लक्ष्मण उपसर्पय।

ततः प्रविशति लक्ष्मणः मन्थरावेषा शूर्पणखा च।

शूर्प। आवेहिअमन्थरासरीरा सुप्पणहा अहं। वसिट्ठविस्सामित्त गमणेण सुसमाहिदं। अह्मो एसा परसुरामविजई खत्तिअ कुमारओ रामो। निर्वर्ण्य। अहो समग्गसोहग्गलच्छीपरिग्गहेण लोअणरसाअणसोम्मं से शरीरणिम्माणं भो दाणिं चिरआलवेहव्वदुक्खपब्भसिदसंसारसोक्खस्स वि जणस्स चारित्तधीरसुपुरिदं पुणोवि हिअअं परिप्फुरावेदि॥

रामः। प्रणिपत्य। अपि मन्थरे कुशलमम्बायाः।

शूर्प। सुहं कुसलं च। वच्छलदापह्णुदत्थणी मज्झमा दे मादा परिसज्जिअ आसवेदि। पुत्तअ पुरा पडिस्सादे दुवे वरे महाराएण जाणावेमि। एत्थ मे विसत्तिहारओ होइ एस तादस्स कज्जलेहो।

लक्ष्म। गृहीत्वा वाचयति।

अस्त्वेकेन वरेण वत्सभरतो भोक्ताधिराज्यश्रियः

स्वगतम्। कथमेतदार्य्ये तिष्ठति कनिष्ठस्यार्य्यस्य भरतस्य राज्यप्रार्थनम्। प्रकाशम्।

यात्वन्येन विहाय कालहरणं रामो वनं दण्डकाम्।

स्वगतम्। हा अम्ब किं कृतं त्वयार्य्य गमनवरणेन।

प्रकाशम्। तस्यां चीरधरश्चतुर्द्दश समाश्लिष्टत्यसौ तं पुनः

सीतालक्ष्मणमाचकात् परिजनादन्यो नचा नुव्रजेत्॥

स्वगतम्। हा पापे रण्डे मातृबन्धो

सदा भरतशत्रुघ्नलक्ष्मणार्य्य मुखैः कृताम्।

अम्बेति व्याहृतिं हित्वा किं कृतं पापया त्वया॥

रामः। अहो प्रसादप्रकर्षः।

तत्रैव गमनादेशो यत्र पर्य्युत्सुकं मनः।

नचैष विरहो जातः सच वत्सो ममाऽनुगः।

लक्ष्म। दिष्ट्यानुमोदितो ऽहमार्य्येण।

रामः। आर्य्ये मन्थरे एष प्रस्थितो ऽस्मि।

शूर्प। णमो दाणिं भअवदो संसारस्य जत्थ ईरिसा बि कण्णहुमा परोहन्ति।

इति निष्क्रान्ता।

लक्ष्म। अये मातुलो युधाजिदार्य्यभरतश्च चरस्तातमुपसर्पति।

रामः। दिष्ट्या कष्टं च।

अपरिष्वज्य भरतं नास्ति मे गच्छतो धृतिः।
अस्मत्प्रवासदुःखार्त्तं नत्वेनं द्रष्टुमुत्सहे॥

। प्रविश्य युधाजिद्भरतौ दशरथमुपसृत्य ।

देव। श्रूयतां यदेकायनीभूय प्रकृतयस्त्वां विज्ञापयन्ति।
चयाख्याता यस्त्वयायं तनूजस्तेनाद्यैव स्वामिनस्ते प्रसादात्।
राजन्वत्यो रामभद्रेण राज्ञा लब्धक्षेमाः पूर्णकामाश्चरामः।

दश। सखे जनक
प्रिये कल्याणकामाभिः प्रजाभिर्नोदिता वयम्।
किं तु रामप्रियौ नेह मैत्रावरुणकौशिकौ।

जन। परोक्षे सुकृतं कर्म्म तयोः प्रीतिं करिष्यति।
मन्त्रज्ञो वामदेवस्तु भगवानास्त एव हि॥

दश। यद्येवं तदयमेव जामदग्न्यविजयमहोत्सवः प्रसज्यतामभिषेकमहोत्सवेन।

रामः। इदमिदानीं कथम्।

दश। सुमन्त्र संनिधाप्यन्तामाभिषेचनिकाः सम्भाराः। यश्च येनार्थी स तेन पर्य्याप्तकामः कर्त्तव्यः।

रामः। उपसृत्य प्रणम्य च। अहं तावदर्थी।

दश। वत्स केन।

रामः। यो ऽसौ वरद्वयन्यासस्त्वां माताद्य मध्यमा।
यथेष्टं नायते तात तत्प्रसादार्थिनो वयम्॥

दश । सत्यसन्धा हि रघवः किं वत्स विचिकित्ससे ।
त्वयि दूते ऽपि कस्तस्याः प्राणानपि धनायते ॥

रामः । वत्स वाच्यताम् ।

लक्ष्म । अस्त्वेकेन वरेणेत्यादिकं वाचयति ।

इतरे । कथमन्यदेव किमपि । हा हा हताः स्मः ।

राजा । मूर्च्छति ।

रामलक्ष्मणौ । तात समाश्वसिहि समाश्वसिहि ।

जन । इक्ष्वाकुवंशतिलकस्य नृपस्य तस्मिन्
पत्नी विशुद्धिमति राजकुले प्रसूता ।
अत्याहितं किमपि राक्षसकर्म्म कुर्या
दार्या सती कथमहो महदद्भुतं नः ॥

रामः । तात तात ।
सत्यसन्धाः स्थ यदि वा रामो यदि च वः प्रियः ।
तत् प्रसीदतु तातो नः पूर्णकामास्तु मध्यमा ॥

दश । एवमस्तु का गतिः ।

जन । हा वत्स रामभद्र हा वत्स लक्ष्मण
पुत्रसंक्रान्तलक्ष्मीकै र्यद्वृद्धैरिक्ष्वाकुभिर्धृतम् ।
त्वया तत् चीरकण्ठेन प्राप्तमारण्यकं व्रतम् ॥
वत्से जानकि धन्यासि यस्यास्ते गुरुनियोगादेव भर्त्तुरनुगमनम् ।

दश । हा वत्से जानकि कङ्कणधरैव रक्षसामुपनीतास्युपहारताम् ॥

इत्युभौ मूर्च्छतः ।

रामः । अत्यापन्नो गुरुजनः कथं नामैतत् ।

लक्ष्म । आर्य्य ईदृशोऽयमायातः करुणस्य हसंवेगः । किमत्र क्रियते प्रतिषिद्धं च नः कालहरणं भरतजनन्या । तदलमतिस्नेह कातर्य्येण ॥

रामः। साधु आचारनिष्ठुर साधु अमनुष्यसदृशस्ते चित्तसारः। तद्वत्स वैदेहीमानय।

॥ लक्ष्मणो निष्क्रान्तः ॥

भरतः। मातुल मातुल युक्तमेतद्वो गृहस्य।

युधाजित्। वत्स उद्भ्रान्तः संवृत्तोऽस्मि।

पतिर्म्ह त्योर्वक्त्रं व्रजति वनमेतत् सुतयुगं
वधूटी रक्षोभ्यो वलिरिव वराकी प्रणिहिता।
निरालम्बो लोकः कुलमयशसा तच्च निहतं
स्वसुर्मे दौरात्म्यं जगदविकलं विक्लवयति॥

॥ ततः प्रविशति लक्ष्मणः सीता च ॥

लक्ष्म। आर्य इयमार्या।

रामः। इतइतः। सीतालक्ष्मणाभ्यां सह गुरुजनं प्रदक्षिणीकृत्य। मातुल। एष तातस्य तातस्य प्रियापत्यास्य मातरः।
आश्वासनीयाः शोकेऽस्मिन् भवतैव गता वयम्।

॥ इति परिक्रामति ॥

युधा। सावेगम्। कथं वारण्ये त्यजामि। उत्थायानुधावति॥

भरतः। अनुगच्छन्। मातुल ब्रूहि किमिदानीं करोमि।

युधा। रामभद्र रामभद्र अपेक्षस्व पादपरिचारकमरण्यानुचरं भरतम्।

रामः। नन्वस्यापि वर्णाश्रमरक्षणे गुरुनियोगः।

भर। लक्ष्मणस्य शत्रुघ्नस्य वा तदस्तु।

रामः। किमत्र कस्यचित् स्वरुचिः।

भर। एतावती मम स्वरुचिः।

रामः। आः शक्यं नाम मयि तिष्ठति त्वयान्येन वा युक्तमुल्लङ्घयितुम्।

भर। हा हा कथं परित्यक्तोऽस्मि मन्दभाग्यः। इति मूर्च्छति॥

युधा। वत्स समाश्वसिहि समाश्वसिहि।

भर। आश्वस्य। मातुल मातुल धारयस्व माम्।

युधा। वत्स एवं तावत्। भरतस्य कर्णे कथयित्वा। रामभद्र एवमयं विज्ञापयति। यदेतद्भगवता शरभङ्गेन प्रेषितं तपनीयोपानद्युगलं तदार्यः प्रसादीकरोत्विति।

रामः। तदुन्मुच्य गृहाणेदं वत्स।

भर। शिरस्यारोप्य। आर्य—

राम। परिष्वज्य। मत्पादस्पृष्टिकया प्रतिनिवर्त्तस्व। संप्रति संभावय चिरप्रमूढौ तातौ।

भर। अयमिदानीमहम्

नन्दिग्रामे जटां बिभ्रदभिषिच्यार्य्यपादुके।
पालयिष्यामि पृथिवीं यावदार्य्यो निवर्त्तते॥

सीतारामौ प्रदक्षिणीकरोति॥

लक्ष्म। आर्य्य भरत लक्ष्मणः प्रणमति।

भरतः। परिष्वज्य बाष्पस्तम्भं नाटयति॥

रामः। वत्स तातौ संभावय।

भर। कष्टमद्यापि नोच्छ्वसितः। इति वीजयति।

जन। समुच्छ्वस्य सर्व्वतोविलोक्य। हा हा मुषितोऽस्मि॥

दश। उच्छ्वस्य। वत्स रामभद्र न गन्तव्यम् न गन्तव्यम्।

प्राणाः पतन्ति परितस्तमसा हतोऽस्मि
मर्म्मच्छिदो मम रुजः प्रसरन्त्यपूर्व्वाः।
अक्ष्णोर्मुखेन्दुमुपधेहि गिरं च देहि
हा पुत्र मय्यकरुणः सहसैव मा भूः॥

॥ सोन्मादमिव ॥

निर्भरं भोः क्व प्रविशामीदानीं मन्दभाग्यः॥

इति विक्लवो भरतजनकाभ्यां नीयमानो निष्क्रान्तः॥

युधा। वत्स रामभद्र रामभद्र।

एकीभूय शनैरनेकसमयव्युत्पन्नमेकक्रियं
मुक्ताक्रन्दमितस्ततः किमिद मित्युद्भ्रान्तनारीनरम्।
एतत्तत् पुरमन्यथैव सहसा संजात मावेद्यते
यस्मिन् कर्दमितेषु वर्त्मसु घनैर्बाष्पाम्बुभिर्दुर्दिनम्॥

रामः। मातुल मातुल प्रतिनिवर्त्तस्व। अयञ्च वो हस्ते भरतः।

युधा। अनुरुद्धयस्व मामनुगच्छन्तम्।

रामः। शान्तम्। गुरवो यूयं नानुगन्तारः। आत्मना तृतीयेन गन्तव्यमित्यम्बाया आदेशः॥

युधा। किमहमेकोऽनुगच्छामि अपितु सबालवृद्धाः प्रकृतयः किं न पश्यसि।

स्कन्धारोपितयज्ञपात्रनिचयाः स्वैर्वाजपेयार्ज्जितै
श्छत्रैर्वारयितुं तवार्ककिरणानेते महाब्राह्मणाः।
साकेताः सह सैनिकैरनुपतत्पत्नीगृहीताग्नयः
प्राक्प्रस्थापितहोमधेनव इमे धावन्ति वृद्धा अपि॥

रामः। मातुल मातुल गुरुभिरेव शिशवो धर्म्मलोपात् पालयितव्याः तत् प्रसीदत नः प्रतिनिवृत्य निवर्त्तयतामयं महाजनः।

इति प्रणमति।

युधा। वत्सोत्तिष्ठोत्तिष्ठ। एष वो वञ्चयित्वा प्रजाः क्वापि मन्दभाग्यो गच्छामि।

त्वां लक्ष्मण महाबाहो त्वां च वैदेहनन्दिनि।
आमन्त्रये निवृत्तोऽस्मि पापः कल्याणमस्तु वाम्॥

॥ रुदन् प्रतिनिवृत्य।

अहो नु खलु भोः।

प्रतिमन्वन्तरं भूतैर्गीयमाना चरिष्यति ।
प्रातः पवित्रं लोकानामियं चारित्रपञ्जिका ।

॥ इति निष्क्रान्तः ॥

लक्ष्म । कथितमार्य्यस्य शृङ्गवेरपुरवास्तव्येन निषादपतिना गुहेन तत्प्रदेशपर्य्यन्तावस्कन्दिनो विराधराक्षसस्य दुर्विलसितम् ।

रामः । तेन हि विराधहतकोन्मथनाय सन्निकृष्टप्रयागमनुषक्त मन्दाकिनीपवित्रमेखलं चित्रकूटं नामाचलमुपेत्य मुनिभिरुप जुष्टतीर्थं रक्षांसि निहत्य दण्डकां प्राप्य सन्निहितगृध्रराजं क्रमेण यामो जनस्थानम् ।

इति निष्क्रान्ताः सर्व्वे ॥

चारित्रं नाम चतुर्थोऽङ्कः ॥

---

॥ पञ्चमोऽङ्कः ॥

॥ ततः प्रविशति सम्पातिः ॥

सम्पा । नूनमद्य वत्सजटायुरभिवादनाय मलयकन्दरकुलाय मुपसीदति । तथाहि ।

पर्य्यायक्षणदृष्टनष्टककुभः संवर्त्तविस्तारयो
र्नीहारीकृतमेघमोचितधुतव्यक्तस्फुरद्विद्युतः ।
आरात्कीर्णखणत्खणीकृतगुरुग्रावोच्चयश्रेणयः
श्येनेयस्य दृहत्पतत्रधुतयः प्रख्यापयन्त्यागमम् ॥
दूरोद्वेल्लितवाड़वस्य जलधेरुल्लोलभिन्नाम्भसो
रन्ध्रैरापतितेन वेगमरुता पातालमाध्मायते ।
यद्वै कुण्ठवराहकण्ठकुहरस्फारोच्चरद्भैरव
ध्वानोच्चण्डमकाण्डकालरजनीपर्ज्जन्यवद्गर्जति ॥

प्रविश्य जटायुः ।

जटा । कावेरीवलयितमेखलस्य सानौ
वेकस्मिन् मलयगिरेर्दिवः पतामि ।
यत्रार्य्यो निवसति काश्यपः शकुन्तः
शैलेन्द्रोऽपरइव विप्रयुक्तपक्षः ॥
विस्रंसयन्ती परिगृह्य पक्षौ
जाता ममाप्युत्पतनश्रमार्त्तिः ।
शक्तिर्हि कालस्य विभोर्जराख्या
शक्त्यन्तराणां प्रतिबन्धहेतुः ॥
तदयमार्य्यो मन्वन्तरपुराणगृध्रराजः सम्पातिः ।
अहो भ्रातृस्नेहः ॥
पुराकल्पे दूरोत्पतनखुरलीकेलिजनिता
दतिप्रत्यासङ्गात् परितपति गात्राणि तपने ।
अवष्टभ्यासौ मामुपरिततपक्षः शिशुरिति
स्वपक्षाभ्यां स्नोषादविकलमरक्षत् करुणया ॥

॥ उपसृत्य ॥

आर्य्य काश्यप त्वां जटायुरभिवादयते ।

सम्पा । एह्येहि वत्स ।
त्वया पुत्रवती श्येनी गृध्राणां चक्रवर्त्तिना ।
गरुत्मतेव वीरेण विनता नः पितामही ॥
परिष्वज्य वत्स जटायो अपि कालविप्रकर्षान्मन्दी
भूतः पितृमरणशोको रामभद्रस्य ।
जटा । तस्य विद्यातपोवृद्धसंयोगः स्वा च धीरता ।
न्याय्यो रक्षाधिकारश्च दौर्मनस्यं व्यपोहति ॥

सम्पा। तृप्तैर्विराधमांसानां गृध्रैरावेदितं हि मे ।
चित्रकूटाद्यथा रामः शरभङ्गाश्रमं गतः ॥
तदा च शरभङ्गेन हव्यवाहे हुता तनुः ।
अथोपसेदिवान् रामः सुतीक्ष्णादीन् मुनीनपि ॥

जटा। बाढमधुनागस्त्यप्रवचनाद्रामः पञ्चवट्यां प्रतिवसति ॥

सम्पा। चिरात् स्मृत्वा। आः अस्ति जनस्थाने पञ्चवटी नाम गोदावरीतटोद्देशः। वत्स जटायो विषयबाहुल्यं काल विप्रकर्षश्च नः स्मृतिं मुष्णाति।

कल्पस्यादौ मम परिचयस्तावदासीदुदस्थाद्
यावद्विष्णोरुपरि (१) चरणश्चारुगङ्गापताकः ।
पर्य्यन्तेष्वप्यवधिवलयस्तेजसां यावदद्रि
र्लोकालोकः परिकलयिता सप्तमस्याम्बुराशेः ॥

जटा। तत्रैकदा रघुनन्दनं दूषयन्ती शूर्पणखा प्राप्ता ।

सम्पा। अहो निर्मर्य्यादता।
अनेकयुगजीविन्यास्तिता यस्यास्त्रयोदशी ।
सा क्षीरकण्ठं तं वत्सं लज्जयन्ती न लज्जिता ॥

जटा। तस्याश्च कर्णनासौष्ठकर्त्तनेन न्यवीविशत् ।
दशाननतिरस्कारप्रशस्तिमिव लक्ष्मणः ॥

सम्पा। तन्निमित्तकस्तर्हि कश्चिदनुबद्धः परैरभियोगः ।

---

(१) उपरि दिवि। पादोऽस्य सर्व्वाभूतानि त्रिपादस्यामृतं दिवीति छान्दोग्ये। त्रिपादस्य अस्य ब्रह्मणःसर्व्वभूतानि एकः पादः दिवि यत् पदं तदमृतं, मोक्षप्राप्तिहेतुत्वादमृतमिव ॥ तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे। नभः प्रक्रममाणस्य सक्थिदेशे महात्मनः। परं प्रक्रमाणस्य पादमूले व्यवस्थितौ। विष्णोरमितवीर्य्यस्य वदन्त्येवं द्विजातयइति हरिवंशे २६२ अध्या।

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000074

जटा। बाढम्। एकेनैव च रामभद्रेण
चतुर्दश सहस्राणि चतुर्दश च राक्षसाः।
त्रयश्च दूषणखरत्रिमूर्द्धानो मृधे हताः॥

सम्पा। आश्चर्यम्। अथवा नाश्चर्यमेतद्दाशरथौ। महत् पुनरपाहृतं वैरद्वारमिति मन्यमानः संप्रमुग्धोऽस्मि। तद्वत्स जटायो नास्मिन्नवसरे सीतारामलक्ष्मणास्त्वया क्षणमपि मोक्तव्याः।

स्वसुः सोदर्यायाः कथमिव निकारं दशमुख
स्त्वया भूयोभूयः स्वजनविनिपातं च सहते।
मदान्धो मायावी प्रभुरमितवीर्योऽन्तिकचरः
सपत्नः कष्टं नो निपुणमनुपाल्या हि शिशवः॥

अहमपि समुद्रे कृताह्निकः शिवतातिपरिणति मनुध्यास्यामि॥

॥ इति निष्क्रान्तः॥

जटा। उत्पत्य गगनगमनमभिनीय।
एषोऽहं प्रलयमरुत्प्रचण्डरंहः
संक्षिप्तप्रथिम पिबन्निवान्तरिक्षम्।
द्वैपीयो मलयगिरेर्निवासभूभृत्
संसक्तक्षितिरुहजालमभ्युपेतः॥

अयमविरलानोकहनिवहनिरन्तरस्निग्धनिर्म्मलपरिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः सततमभिष्यन्दमानमेघमेदुरितनीलिमा जनस्थानमध्यदेशगो गिरिः प्रस्रवणो नाम। इयं च पञ्चवटी। विभाव्य। अये

दूरं हृतश्चित्रमृगेण राम—
स्तया दिशा गच्छति लक्ष्मणोऽपि।
ततः परिव्राडुटजं प्रविष्टो
धिग् व्यक्तरूपो दशकन्धरोऽयम्॥

प्रमादः। परःसहस्रैरायुक्तं पिशाचवदनैः खरैः।
रथं बधूटीमारोप्य पापः क्वाप्येव गच्छति ॥
पौलस्त्य पौलस्त्य
धर्त्तारः प्रलयेषु ये भगवतो वेदस्य विश्वेश्वरा
स्तेषामन्वयसम्भवस्य भवतः स्नातस्य वेदव्रतैः।
जेतुर्वै जलसद्मनोऽपि (१) तपसा हन्तस्य राज्ञः सतो
निन्द्या दुश्चरिता च नाभिजननी जाता कथं दुर्मतिः ॥
कथमवज्ञया न शृणोतीव। आःदुरात्मन्निर्कृतापसद तिष्ठ तिष्ठ
तुण्डप्रोतशिरःकरोटिशिखराकृष्टिस्फुरत्प्रस्फुट
स्रोमस्नीहयकृद्गतोष्णरुधिरस्राव्यन्त्रजालस्य ते।
अत्युग्रक्रकच प्रचण्डनखरोत्कृत्तक्वणत् कीकसै
रङ्गैः खण्डितकन्धराधमनिभिः श्येनीसुतस्तृप्यतु ॥

॥ निष्क्रान्तः ॥

॥ विष्कम्भकः ॥

॥ प्रविश्य लक्ष्मणः ॥

हा आर्ये क्वासि कष्टं दशाविपाकमनुभवत्यार्यो मारीचात्
एष मूर्त्त इव क्रोधः शोकाग्निरिव जङ्गमः।
क्षच्छ्रादिबभर्त्ति हृल्लेखज्वालासंवेगिनीं तनुम् ॥
तथाहि। आभुग्नभ्रुकुटीविटङ्कघटनासंसूचितान्तःस्फुरद्
धैर्य्यस्तम्भितदुर्व्यवस्थविततप्राचण्डकोपानलः।

---

(१) जलसद्मनो वारुणलोकस्य।
ततोरसातलं रक्षः प्रविष्टं तोयसन्निधिमित्युपक्रम्य। हर्षा-
न्नादं विमुञ्चन् वै निष्क्रामन् वरुणालयादिति रामा उत्त का
२४ सर्गे।

उद्भूमावलिरम्भसामिव निधिर्मध्यज्वलद्वाडवो
विद्युद्द्यञ्जित वज्रगर्भजलदच्छायां समालम्बते ॥

॥ ततः प्रविशति रामः ॥

रामः। न्यक्कारो हृदि वज्रकील इव मे तीव्रः परिस्पन्दते
घोरे ऽन्धे तमसीव मज्जति मनः संमीलितं लज्जया।
शोकस्तातविपत्तिजो दहति मां नास्त्येव यस्मिन् क्रिया
मर्म्माणीह पुनर्भिनत्ति करुणा सीतां वराकीं प्रति ॥

लक्ष्म। आर्य्यआर्य्य न खलु लोकोत्तरकर्म्माणस्त्वादृशाः प्रमुह्यन्ति कृच्छ्रेषु ॥

रामः। वत्स लोकोत्तराण्येव कर्म्माणि रामस्य।
ये गुप्तान्यकुतोभयानि भुवनान्यासन् महाभीशव
स्ते सूर्य्यान्वयकेतवो नृपतयः पूर्व्वे तिरस्कारिताः।
कल्पान्तेष्वपि यः स्थितः स गमितः साधुर्जटायुर्दिवं
पत्नीं हारयता वने यदकृतं लोकैः कृतं तन्मया ॥
हा तात काश्यप शकुन्तराज क्व पुनस्त्वादृशस्य महत
स्तीर्थभूतस्य साधोःसम्भवः ॥

लक्ष्म। पश्यामीव तां पश्चिमामवस्थां तातस्य
यामोषधिमिवायुष्मन् विचिनोषि वनेवने।
सा सीता मम च प्राणा रावणेनोभयं हृतम् ॥
इत्येतदेवाभिधाय वीरलोकमधिष्ठितस्तातः ॥

रामः। वत्स वत्स हृदयमर्म्माविधः खल्वमी कथोद्घाताः।

लक्ष्म। अतश्च तस्मिन् दुरात्मनि सर्व्वप्रकारेण वैरानृण्यमुपगच्छावः।

रामः। अथ किम्। किं हि नामैतत् करिष्यते यदेतावतः परिभवातिप्रसङ्गस्य तुल्यं स्यात् ॥
प्रागेव राक्षसवधाय मतिः स्थिता मे
वध्या हि ते बहुभिरेव यतो निमित्तैः।

तन्माचके त्विह कृतेऽपि कुतः शमो मे
कृत्यं कुलस्य कदनात् परतश्च नान्यत् ॥

तथापि वत्स। प्रचण्डपरिपिण्डितः स्तिमितवृत्तिरन्तर्मुखः
पिबन्निव मुहुर्मुहुर्झटिति मन्युरुच्चैर्ज्वलन्।
शिखाभिरिव निश्चरन्ननुपलब्धदाह्यान्तरः
पयोधिमिव वाडवो दहति मामतस्त्वायताम् ॥

लक्ष्म। एतान्यतिसंभ्रान्तविविधमृगयूथान्युन्मत्तचण्डश्वापदकुलाक्रान्तविकटगिरिगह्वराण्यरण्यानि दक्षिणां दिशमभिवर्त्तन्ते तदेभिरेव पथिभिर्भवावः ॥

रामः। अदृष्टपूर्व्वाः खल्वमी जनस्थानविभागाः।

लक्ष्म। ननु तदैव तातमारुणिं गृध्रराजमग्निसात्कृत्य निर्गतयोः पञ्चवट्याश्रमादावयोः कोऽपि कालो वर्त्तते यदा दूरविच्छिन्नाः सम्प्रति जनस्थानसीमानः। यथा चैतान्यग्रतः प्रतिभयजननान्यरण्यानि तथा नूनमसौ जनस्थानपश्चिमः कुञ्जवान् नाम दनुकबन्धाधिष्ठितो दण्डकारण्यविभागः ॥

रामः। द्रष्टव्यएव स दुरात्मा कान्तारमण्डूकः ॥

नेपथ्ये।

कः कोऽत्र भोः परित्रायतां परित्रायतामनेन दुरात्मना राक्षसकबन्धेनाकृष्यमाणामरण्ये स्त्रियम्।
अहं हि श्रमणा नाम सिद्धा शबरतापसी।
मतङ्गाश्रमवास्तव्या रामान्वेषिण्युपागता ॥

रामः। वत्स लक्ष्मण गच्छ गच्छ।

लक्ष्म। एष गतोऽस्मि। इति निष्क्रान्तः।

रामः। प्रिये हाहा क्वासि प्रकिर मधुरां वाचमथ वा
पराभूतैरित्थं विलपनविनोदोऽप्यसुलभः।

अनिन्द्यः पौलस्त्यो व्रजतु परिवादो मयि पुन
र्गतो रूढे वैरे बहुगुणमनेन प्रविकृतम् ॥

॥ ततः प्रविशति लक्ष्मणः श्रमणा च ॥

लक्ष्म । तत् क्रूरदन्तकरपचनिकृत्तसत्त्व
संघातनिःसरदसृक्स्नुतकूर्चगुच्छम् ।
वक्त्रं वपुश्च विकृताकृति दीर्घबाहो
रार्य्येण राक्षसकुतूहलिना न दृष्टम् ॥
आर्य्ये श्रमणि अयमार्य्यः ।

श्रमणा । जयति जयति देवः ।

रामः । अथास्मत्पर्य्यन्वेषणे किं प्रयोजनम् ।

श्रम । शृणोषि रावणानुजं विभीषणम् ।

रामः । कस्तं न शृणोति ।

श्रम । स च दैवाद्यदेव खरदूषणप्रभृतयो निहतास्तदेव बन्धुभ्यः कस्यापि हेतोः परिक्रम्य सुग्रीवसख्यादृष्यमूके वर्त्तते तस्यायमात्मसमर्पितो लेखः । इति लेखमर्पयति ।

लक्ष्म । गृहीत्वा वाचयति । स्वस्ति रामदेवं प्रणम्य विभीषणो विज्ञापयति ।
विश्लिष्टभागधेयानां त्वयी नः परमा गतिः ।
धर्म्मः प्रकुष्यमाणो वा गोप्ता धर्म्मस्य वा भवान् ॥

रामः । वत्स ब्रूहि किं प्रतिसंदिश्यतामेवंवादिनः प्रियसुहृदो लङ्केश्वरस्य तत्रभवतो महाराजविभीषणस्य ॥

लक्ष्म । यदा लङ्केश्वरः प्रियसुहृदित्युक्तमार्य्येण तत् किमवशिष्यते सन्देशस्य ।

रामः । यथाह सौमित्रिः ।

श्रम । अनुगृहीताः स्मः ।

लक्ष्म। आर्य्ये श्रमणे कथय विभीषणसम्पर्कादस्ति काचिदार्य्यायाः प्रवृत्तिः।

श्रम। वर्त्तमाने नास्ति। यदा पुनर्दुरात्मना राक्षसापसदेना पह्रियमाणायाः स्खलमनमूयानामाङ्कमुत्तरीयं तच्च तैर्गृहीतम्॥

रामः। हा प्रिये महारण्यवासप्रियसखि विदेहराजनन्दिनि—

॥ इति संवरणं नाटयति ॥

लक्ष्म। आर्य्ये केन कस्य वा हेतोस्तद्गृहीतम्।

श्रम। ऋष्यमूके रामगुणपक्षपातात् सुग्रीवविभीषणहनूमत्प्रभृतिभिः।

रामः। द्रष्टव्या हि निष्कारणप्रियकारिणो भुवनमहनीयमहिमानस्ते महात्मानः तच्च सीतावासश्च्युतमभिज्ञानं तदृष्यमूकमभिसन्धाय तावद्गच्छावः।

श्रम। इतइतस्तर्हि देवः। इति परिक्रामति।

लक्ष्म। हनूमानिति महानेष वीरवादस्तत्रभवतो जातमात्रस्य तस्य समुद्भ्रान्तदेवासुराण्यद्भुतोदाहरणान्यनुश्रयन्ते।

अपिच किल। यदञ्जकर्षणे वीर्य्यं यद्धायौ वा समुन्नतिः।
यदालिनि महाबाहौ तच्च वीरे हनूमति॥

श्रम। एवमीदृशो हिमगिरिवास्तव्यस्य तत्रभवतः प्लवङ्गपुङ्गवानीकदृङ्घयूथपतेः केसरिणः क्षेत्रसंभवः सूनुराञ्जनेयो हनूमान्नाम। यस्य रेतोधाः पिता भगवान् मातरिश्वा। तत् किं हनुमतैकेन।

अम्भोधेर्नालिकेलीरसमिव चुलुकैरुच्चु लुम्पन्त्यपो ये
येषामुत्क्षेपहेतुः शिखरिषु निकुचोदुम्बरप्राय एषः।
ब्रह्मस्तम्बं निवासद्रुममिव रभसादिप्रकर्त्तुं क्षमा ये
तेषां कोट्योऽप्यसंख्याः सुतममरपतेर्वानराणां नमन्ति॥

रामः। आर्य्य हन्त दक्षिणेन सुमहानग्निसञ्चयः। तत्किमेतत्

श्रम। लक्ष्मणकुमारेण तस्य योजनबाहोश्चितेयमभिहृष्टा।

रामः। साधु साधु कृतम्।

लक्ष्म। आर्य्य पश्य पश्य।

सौहित्यात् पृथवः कृथन्ति रुधिरोत्सेकाश्चमत्कारिण
ष्टात्कारोत्कटमुत्कटन्ति नलकास्त्वङ्मांसविस्रंसनात्।
उत्सर्पन्त्यथ मेदसां विकलनाद्बुद्बुदा वीचय
श्चित्रं चित्रमुदेति कोऽप्ययमितो दिव्यः श्मसानालयात्॥

॥ प्रविश्य दिव्यपुरुषः ॥

जयति जयति रामदेवः।
दनुर्नाम श्रियः पुत्त्रः शापाद्राक्षसतां गतः।
इन्द्रास्त्रकृतकाबन्धत्रः पूतोऽस्मि भवतां श्रयात्॥

रामः। प्रियं नः प्रियम्।

दनुः। माल्यवत्प्रयुक्तेन च मया युष्मदासादनाय दूषितमरण्यमासीत्। अलं वा तत्कालकाश्मल्यस्मरणेन। संप्रति तु युष्मत्प्रभावात् प्रवृद्धसहजज्योतिषः परोक्षमेव वस्तु किञ्चिदक्षप्रतिभाति। तच्च वः प्रतिबोधनाय कृतमहोपकारेभ्यः कथ्यते।

प्रार्थ्य माल्यवता वाली युष्मद्घाते नियुज्यते।
तेनापि रावणे मैत्रीमनुरुद्ध्य व्यपेक्ष्यते॥

रामः। एष एव पन्थाश्चारित्रस्थानाम्।
न तादृशः सुहृत् कार्य्यं माध्यस्थ्यमवलम्बते।
ममाप्यस्मिन् महावीरे सोत्कण्ठमिव मानसम्॥

इतरे। क्वान्यत्र रामदेवादमून्यक्षराणि नाम।

रामः। भद्रं कृतं सौजन्यमधुना। नन्द महाभाग स्वेषु लोकेषु।

हनुः । यथा ज्ञापयति । इति निष्क्रान्तः ।

लक्ष्म । आर्य्य वालिरावणयोः किंनिबन्धना मैत्री ।

श्रम । कैलासे तुलिते जिते त्रिभुवने ह्यप्यन्तमभ्युद्यतं
दोर्युद्धाय दशास्यमिन्द्रतनयः प्रक्षिप्य कक्षालये ।
सान्ध्यं कर्म्म समाप्य सप्तसु नदीनाथेष्वथो मुक्तवा-
नुन्मुक्ताय नताय याचितवते सख्यञ्च तस्मै ददौ ॥

लक्ष्म । दुरात्मन् पौलस्त्यकुलपांसन एष ते क्षत्रियपरितापिनो वीर्य्यस्योत्कर्षः ।

रामः । एवमुत्तरोत्तरभावश्चित्रीयते जीवलोकः ।

लक्ष्म । आर्य्य पुरत एष ते शुभ्रगिरिः किंनामधेयः ।

श्रम । नायं गिरिर्यशोराशिरिव वीरस्य वालिनः ।
एष दुन्दुभिदैत्येन्द्रमहिषस्यास्थिसञ्चयः ॥

लक्ष्म । उपरुद्धान्यनेन वर्त्मानि तत्परिहृत्य गच्छामः ।

रामः । नन्वेहि । पदेन क्षिपति ।

श्रम । आश्चर्य्यम् ।
यत् संक्रन्दननन्दनः कपिवृषा निर्म्मथ्य दोस्तम्भयो-
र्व्यापारेण निरास्थदास्थितगिरेर्द्देवद्विषो दुन्दुभेः ।
तत् कङ्कालमकाण्डपाण्डुरघनप्रस्पर्द्धि रुन्धत् पुनः
पादाङ्गुष्ठविवर्त्तनादयमितो निर्बन्ध्यमाविध्यति ॥

लक्ष्म । प्रशान्तगम्भीरनीलविपुलश्रीररण्यगिरिभूमिः प्रसज्यते ।

श्रम । ऋष्यमूकपम्पापर्य्यन्तभूमयः खल्वेताः । तथा चाग्रतो मतङ्गाश्रमपदम् । यत्र शून्येऽपि सन्निहितसोमचषकविशेषपात्रपरिकरास्तीर्णवर्हिरिध्मवानाज्यगन्धिरद्यापि भगवान् वैश्वानरः समिध्यते ।

रामः । अचिन्त्यसमृद्धयस्तपसां विशेषाः ।

श्रम । देव पश्य पश्य ।

इह समदशकुन्ताक्रान्तवानीरमुक्त
प्रसवसुरभिशीतस्वच्छतोया वहन्ति ।
फलभरपरिणामश्यामजम्बूनिकुञ्ज
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः ॥

अपिच । दधति कुहरभाजामत्र भल्लूकयूना
मनुरसितगुरूणि स्त्यान मम्बूकृतानि ।
शिशिरकटुकषायः स्त्यायते सल्लकीना
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥

लक्ष्म । तत्किमभितएव प्रवृद्धपौरस्त्यमारुतविहन्यमानकदम्बानि काननानि संगलितवाष्पपटलया दृशा परिच्छिद्य धनुरवष्टभ्य धीरचरितशरीरेणार्य्येण सपदि स्थीयते ।

श्रम । वत्स किं न पश्यसि ।
स्थितमुपनतजृम्भागर्भविम्बैः कदम्बैः
कृतमतिकलकण्ठैस्ताण्डवं नीलकण्ठैः ।
उपरिविघटमानप्रौढतापिञ्छनीलः
श्रयति शिखरमद्रेर्नूतनस्तोयवाहः ॥

लक्ष्म । स्वगतम् । अपि नामायमार्य्यः केनचिद्रसान्तरेण विच्छिद्यते ।

॥ नेपथ्ये ॥

मातामह निवर्त्तस्व
त्वन्नियोगादयुक्तोऽपि वधः साधोः करिष्यते ।
पूज्योऽपि ननु मित्रस्य यो गुरुर्गुरुरेव सः ।

लक्ष्म । आर्य्य कोऽयम् ।

श्रम । देव पश्य पश्य
बिभ्राणश्चारु चामीकरकमलमयं दाम दत्तं मघोना
पिङ्गेनाङ्गेन संध्याच्छुरित इव महानम्बुवाहस्तडित्वान् ।

उत्पाताविद्धमूर्त्तेर्दधदुपरि गिरेर्गैरिकाङ्गस्य लक्ष्मी
मन्तः सीमन्तरेखामिव वियति जवादिन्द्रसूनुस्तनोति ॥

लक्ष्म । आर्य्यआर्य्यस्य दिष्ट्या प्राप्तः सः वीरगोष्ठीदानप्रियसुहृन्
माघवतः ।

रामः । स्वगतम् । महावीरः सः ।

। ततः प्रविशति वाली ।

वाली । लोकालोकालवालस्खलनपरिलसत् सप्तमाम्भोधिपूरं
विश्लिष्यत्पूर्व्वकल्पत्रिभुवनमखिलोत्खातपातालमूलम् ।
पर्य्यस्तादित्यचन्द्रस्तवकमवपतद्भूरिताराप्रसूनं
ब्रह्मस्तम्बं लुनीयामिह हि मम विधावस्ति तीव्रो विषादः ।
एवं नामायुक्तमनुरुद्ध्यमानाः पुमांसो महत्ययुक्तगह्वरे पात्यन्ते । यदनेन माल्यवता पौलस्त्यमैत्रीदिवसमनुस्मार्य्य तत्रभवतो रघुध्वजस्य निधने नियुक्तो ऽस्मि । अहो ग्रहः । प्रातरारभ्य मामनुबध्नन् किष्किन्धायाः प्रस्थाप्य संप्रति निवृत्तः । कष्टं भोः कष्टम् ।
दौरात्म्यादरिभिर्निजार्जवशुचौ मायाविभिर्वञ्चिते
धर्म्मात्मन्यतिथौ निजानपि जगत्पूज्ये गृहानागते ।
एतस्मिन्नुचितं न नाम विहितं वाचापि नोक्तं प्रियं
धिक् पापेन मया रिपाविव कथं बद्धो वधायोद्यमः ॥
कथितञ्च सम्प्रत्येवमेव चारकैः । विभीषणेन सुग्रीवस्याप्यनाख्याय रामान्तिकं श्रमणा प्रेषिता । प्रतिपन्नलङ्काधिपत्यश्च तस्य दाशरथिरस्मिन् मतङ्गाश्रमोपकण्ठे वर्त्तत इति । भवत्ववतरामि । तथा नाटयति । कः कोऽत्र भोः ।
विजितपरशुरामं सत्यधर्म्माभिरामं
गुणनिधिमभिरामं द्रष्टुमभ्यागतो ऽस्मि ।

भवति च फलवत्ता चक्षुषस्तत्र दृष्टे
भवति च रमणीयो दर्पकण्डूनिकाषः ॥

रामः । वत्स सौमित्रे मामिहस्थमावेदय महाभागाय ।

लक्ष्म । उपसृत्य । अयमार्यस्तिष्ठति तदुपसर्पतु महाभागः ।

वाली । अपि त्वं पुनरसौ लक्ष्मणः ।

लक्ष्म । अथ किम् ।

उभावुपसर्पतः ।

वाली । स्वगतम् ।

सएष रामश्चरिताभिरामोधर्म्मैकवीरः पुरुषप्रकाण्डः ।
स्वान्येव पूर्व्वाणि परैश्चरित्रैर्यो ऽत्यद्भुतैरप्रतिमो ऽतिशेते ॥

प्रकाशम् । राम

आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा
वैतृष्ण्यं तु ममापि संप्रति कुतस्त्वद्दर्शने चक्षुषः ।
त्वत्साङ्गत्यसुखस्य नास्मि विषमस्तत् किं वृथा व्याहृतै
रस्मिन् विश्रुतजामदग्न्यदमने पाणौ धनुर्जृम्भताम् ॥

रामः । दिष्ट्या यदद्य दृष्टस्त्वं सत्यमेतच्च युज्यते ।
किं त्वशस्त्रेषु युष्मासु कथं रामोऽस्तु सायुधः ॥

वाली । विहस्य । भो महाक्षत्रिय किमित्यननुकम्पनीया
नप्येवमस्माननुकम्पसे ॥
ज्ञाता एव वयं जगत्सु चरितैर्वाग्भिः किमाख्यायते
संयत्तो भव सत्यमस्ति भवतः सत्यो मनुष्यो भवान् ।
शस्त्रैरव्यवधीयमानविजयाः प्रायो वयं तेषु चेद्
ग्राहस्ते सुखमाश्वसन्ति गिरयो यैर्वानराः शस्त्रिणः ॥
तदितः स्थलीमिधितिष्ठाव ॥

लक्ष्म । आर्यत्र यथाह महाभागः स्वजातिसमयव्यवस्थिता युद्ध-
धर्म्मा इति ॥

वालिरामौ। अन्योन्यमुद्दिश्य।
कामं त्वया सह श्लाघ्यो वीरगोष्ठीमहोत्सवः।
किं त्विदानीमतिक्रान्ते त्वय्यवीरा वसुन्धरा ॥

॥ परिक्रम्य निष्क्रान्तौ ॥

लक्ष्म। कथमास्फालिते धनुषि कुपितः सांक्रन्दनिः।
तथाहि। गर्जत्पर्जन्यघोरस्तनितमविरतं तिग्मगम्भीरमन्त
गुञ्जन् गुञ्जाभजृम्भाविहतमुखविशद्विश्वदिक्चक्रवालः ॥
संरम्भोत्तम्भतुङ्गस्थितविततडित्पिङ्गलाङ्गूलकेतु
र्व्यस्तं विस्तार्य दर्पादपिहितगगनोत्सङ्गमङ्गं धुनोति ॥

॥ नेपथ्ये ॥

विभीषण विभीषण ॥
आर्यस्य वालिनइव ध्वनिरेष नूनं
तस्यैव नूतनघनस्तनितप्रचण्डः।
मौर्वीरवश्च कुतएष भयानकः स्या
दद्यापारितं किमु हरेण धनुः पिनाकम् ॥

लक्ष्म। आर्य्य अयं नु कः।
श्रम। सएष खलु विभीषणसखः सुग्रीवः सविमर्षसंरम्भं संप्रहार-
मनुसरति। सर्व्वे च यूथपतयो गिरिगह्वरेभ्यः संपतन्ति ॥
लक्ष्म। तेन हि संप्रति मयाप्यारोपयितव्यं धनुः।
श्रम। एष वालिकायदुन्दुभिकरङ्कसप्ततालगिरिमहीतलान्यवदार्य्य
रामतूणीरमधिशयितः शरः।

॥ नेपथ्ये ॥

मद्द्रोहाच्छपथात् प्रसीदतु मतिः पौलस्त्यसुग्रीवयो
र्हे वीराः कपयः शमोऽस्तु भवतामीशः स एवास्मि चेत्।

रामात् प्राप्तमहार्घप्रवीरमरणस्याशास्तिरेषाद्य मे
योऽहं सूर्य्यसुतः स एष भवतां योऽयं स वत्सोऽङ्गदः ॥

लक्ष्म । तदयमनुचराज्ञानियन्त्रणोन्मुक्तवीरसमयसङ्कुलसदसद्यदुःख निभृतैर्यूथपतिभिरार्य्येण च सपक्षपातवाष्पेण वीक्ष्यमाणः स्वद्रोहशपथयन्त्रितसशोकविभीषणेन याच्यमानशरीरसौष्ठवः प्रयत्ननिरुद्धनिष्ठुरप्रहारमर्म्मच्छेदवेदनावेगः परिष्वङ्गव्याजविघ्नितसुग्रीवकण्ठपरिधीकृतस्वकण्ठकनककमलमालागुणः शक्रसूनुरस्यामपि दशायां वीरश्रिया प्रदीप्यते ।

ततः प्रविशतः सुग्रीवविभीषणौ वाली रामश्च ।

रामः । अप्राकृताभिजनवीर्य्ययशश्चरित्रान्
पुण्यश्रियः कुलमहीधरभूरिसारान् ।
एवंविधानपि निपात्य कटुर्विपाकः
सर्व्वंकषः कषति हा विषमः कृतान्तः ॥

वाली । वत्स विभीषण पश्य पश्य सुष्ठु शोभते वत्ससुग्रीवस्य वक्षसि सहस्रपुष्करमालागुणः ॥

सुग्रीवविभीषणौ । अपवार्य्य ।
अकाण्डशुष्काशनिपातरौद्रः
क एष धातुर्विषमो विवर्त्तः ।
अस्माभिरार्य्यः शपथैर्न्निरुद्धैः
कथं विलङ्घ्यः कथमासितव्यम् ॥

वाली । रामभद्र रामभद्र ।

रामः । आर्य्य अयमस्मि ।

वाली । यदासक्तं दैवादनभिमतसख्येऽपि हि जने
मया सख्यं प्राणैरन्तृण इव तस्याहमधुना ।
यदन्यत् साधूनां तव च गुणराशेः समुचितं
प्रहाणे प्राणानां तदपि हि यथाशक्ति विदधे ॥

रामः। सविनयलज्जाशोकस्तिष्ठति ॥

सुग्रीवविभीषणौ। जनान्तिकम्। आर्य्ये श्रमणे कथमन्यत
हृदादिवास्माकं रामदेवादेष दैवविपाकः।

श्रम। माल्यवता किलैवमिति। उभयोः कर्णे कथयति।

वाली। वत्स सुग्रीव।

सुग्रीवो बाष्पस्तम्भं नाटयति ॥

वाली। ननु सुग्रीव आः प्रातिकूलिकः संवृत्तः।

सुग्री। सकरुणम्। आर्य्यार्य्य प्रसीदाज्ञापय।

वाली। वत्स कथय कस्तवास्मि।

सुग्री। गुरुः स्वामी च।

वाली। त्वं तु मम कः।

सुग्री। शिष्यः प्रेष्यश्च।

वाली। वत्स कथय क आवयोरन्योन्यधर्म्मः।

सुग्री। वशित्वं वो वश्यता च मम।

वाली। तं हस्ते गृहीत्वा। तर्हि दत्तोऽसि रामाय। रामभद्र
नन्वेष गृह्यताम् ॥

रामसुग्रीवौ। कोऽहि पूज्यस्य गुरोर्वचनं न बहु मन्यते।

विभी। अहो विस्तरस्थानेऽपि धर्म्मोपपत्तिविशुद्धः संक्षेपः।

वाली। वत्स सुग्रीव अथ ब्रह्मपुत्रादाचार्य्याज्जाम्बवतः अधीत-
धर्म्मपारायणवचनेन कीदृशस्त्वया मैत्रीधर्म्म आगमितः।

सुग्री। प्राणैरपि हिता वृत्तिरद्रोहो व्याजवर्ज्जनम्।
आत्मनीव प्रियाधानमेतन्मैत्रीमहाव्रतम् ॥

वाली। रामभद्र तवापि भगवतः सहस्रकिरणान्वयपुरोहिताद्व-
सिष्ठादेष एव हि संप्रदायः।

रामः। आर्य्य अथ किम्।

वाली । तदनेन मैत्रीधर्म्मेण भवद्भ्यामन्योन्यस्य वर्त्तितव्यं मदनु-
रोधात् क्रियतामुपनिबन्धः अग्निसाक्षिकश्च समयो नाति
वर्त्तते । संनिहित एवायं मतङ्गयज्ञाग्निः ।

रामसुग्रीवौ । अन्योन्यहस्तग्राहम्

पुण्ये मतङ्गयज्ञाग्नौ सख्यं निर्वृत्तमावयोः ।
ममैव हृदयं तेऽस्तु तवैव हृदयञ्च मे ।

वाली । रामभद्र अयं च वत्सो विभीषणस्त्वया प्रतिश्रुतलङ्काधि-
राज्य एव पुरतः श्रमणायाः ।

विभी । सलज्जाशङ्कम् । कथं ज्ञातोऽस्मि ।

श्रमणालक्ष्मणौ । अहो चारचक्षुष्मत्ता ।

रामः । अथ किम् ।

विभी । तर्हि प्रसन्नं देवेन । इति प्रणमति ।

सुग्री । मयाप्यविदितः श्रमणावृत्तान्तः फलित स्त्विति तर्किता-
र्थोऽस्मि ।

रामः । हे प्रियसुहृदौ महाराजसुग्रीवविभीषणौ एष वामिदानीं
सौमित्रिः ।

लक्ष्म । आर्य्यौ लक्ष्मणोऽभिवादयते ।

उभौ । एह्येहि वत्स । इत्यालिङ्गतः ।

श्रम । अतिगम्भीरः सरसः स्वीकारः ।

वाली । वत्स विभीषण तवाप्यलमिदानीं स्वार्थशालीनतया एवं-
परिणाममेवैतदस्तु । रावणो हि नास्त्येवेति मद्वृत्तान्तेनैव
व्याख्यातम् ।

अपत्यस्नेहसाम्ये ऽपि पिण्डोपजीविनोविशेषतो रावणहि-
तोपस्थानं धर्म्मः स्वयं कथयितुं सम्यग् विभीषणस्य प्रेयसा
योग इति मातामहस्य युक्तम् । महान्तएव हि तादृशा-

नामगाधसत्त्वानामविनयपरिस्पन्दितं जानन्ति। प्रचलन्ति हि मे प्राणाः। तदवसानप्रपातस्थलमुपनयन्तु मां भवन्तः॥

नीलप्रभृतयः।

हा वीर हा मघवनन्दन मन्दराद्रि—
निष्कम्पसार जगदप्रतिमल्ल वीर।
उद्दर्पदुन्दुभिनिशुम्भपटुप्रचण्ड—
दोर्दण्डमण्डल गतोऽसि हहा हताः स्मः॥

इतिरुदद्भिस्तैर्ध्रियमाणः परिक्रम्य।

वाली। भो महात्मानः प्लवङ्गपुङ्गवाः।
सुग्रीवाङ्गदयोः प्रभुत्वमिह यत् सौजन्यमेतद्धि वो
मत्प्रीत्यैव तु नावधीर्यत मनयोर्यद्वो महिम्नः क्षमम्।
प्राप्तः संप्रति रामरावणरणः स्नेहस्य निर्व्यञ्जक
स्तस्मिन्नञ्जलिरेष शान्तमथ वा वीर्येषु वः के वयम्॥

किञ्च। कर्णावर्ज्जितदिङ्मतङ्गजयुगद्वन्द्वोपमर्द्दाश्च ते
पुच्छास्फोटदलत् समुद्रविवरैः पातालभम्पाश्च ताः।
कापेयस्य च पौरुषस्य च तया प्रेम्णो गरिम्णश्च य-
द्दोष्णामुन्मथितद्विषां सुसदृशं तन्मास्म वो विस्मरत्॥

इति निष्क्रान्ताः सर्व्वे॥

महावीरचरिते आरण्यकं नाम पञ्चमोऽङ्कः॥

---

## षष्ठोऽङ्कः।

ततः प्रविशति विषसो माल्यवान्।

माल्य। सचिन्तम्। अहह रक्षःपतेर्दुर्विनयविटपिकोरकाः परितः प्रकीर्णा इव।

वीजं यस्य विदेहराजतनयायाच्ञाङ्कुरो ऽपि स्वसु
र्याचा तौ परिवर्द्धितुं किसलयं मारीचमायाविधिः।
शाखाजालमयोनिजापहरणं तस्य स्फुटं कोरकाः
कोशाधीशवधो ऽनुजस्य गमनं सख्यं तयोस्तेन च॥

अयमचिरादेव फलोन्मुखो ऽपि भवितेति मन्ये। यतो हृद्बुद्धिरनागतं पश्यति। निश्वस्य। अहो वामता भागधेयानाम्।

व्यसने ऽस्मिन् मन्त्रशक्त्या यद्यत् प्रतिकृतं मया।
अलसस्य यथा कार्यं तत्तत् प्रच्युतमात्मना॥

सानुतापम्। साचिव्यं नाम महते सन्तापाय।

यत्किञ्चिद्दुर्मदाः स्वैरमाद्रियन्ते निरर्गलम्।
तत्र तत्र प्रतीकारश्चिन्त्यो वक्रे विधावपि॥

अहो दुरात्मनः क्षत्रियवटोः सर्वातिशायि चरितम्। यत्तथाविधशौर्यशोष्माणं कपिचक्रवर्त्तिनं शरैः संयमयता किं नाम न विहितम्। स्मरणं नाटयित्वा। उक्तञ्च किष्किन्धातः प्रतिनिवृत्तेन चारकेण यत् सीतामन्वेष्टुमनुदिशमभिदुद्रुवुः कपिपुङ्गवा इति।

॥ नेपथ्ये ॥

भ्रान्तीः सम्राधिकानां प्रविदधदरुणैरर्चिषां चक्रवालैः
द्राम्बीराणामलक्ष्यप्रकृतिरतिसमुत्तमरौक्मालयेषु।

अर्द्धभ्रष्टापसर्पद्रजनिचरभटोद्गाढकल्यान्तशङ्कं
लङ्कां प्रौढो ऽुताशः सह परिदलितो ऽब्धेस्त्रिकूटेन लीढे॥

॥ प्रविश्य पटाक्षेपेण संभ्रान्ता त्रिजटा ॥

त्रिज। परित्ताअद् परित्ताअद् कणिदुमादामहो। घोरस्ताडं पतति।

माल्य। वत्से अलं कातरतया किमिदमुच्चैरत्याहितम्।

त्रिज। उत्थाय। कणिदुमादामह किं कहेमि मन्दभाइणी एसो क्खु कोबि दुट्टबाणरो सअलं बिड्ज्जिअ णअरं खण-मत्तएण तीरकक्खणहरिणीक्खेबबिक्खित्तबिबिहरक्खसलोओ अक्खेण क्खु कुमालएण अनुबन्धिज्जमाणो तस्सिं कदन्त-लीलं कदुअ भत्ति णिक्कन्तो।

माल्य। सखेदम्। किं नाम दग्धं नगरं हतोऽचः कुमारः। अपि को नामायं कपिः स्यात्। सस्मरणम्। उक्तञ्च चारकेण हनुमानवाची दिशमिति। अहह।

तूलदाहं पुरं लङ्कां दहतैव हनूमता।
अपि लङ्कापतेस्तीव्रः प्रतापो निरवाप्यत॥

वत्से अपि तेन सीताप्रवृत्तिरुपलब्धा।

त्रिज। कणिदुमादामह पुरदो ज्जेव कोबि मक्कटपरमाणु तीए समं मन्तअन्तो दिट्ठो तीए बि उम्मोचिअ केसाहरणं अहि-साणं त्ति तस्स हत्थे समप्पिदं एत्तिअं जाणामि।

माल्य। किं न पर्याप्तम्। साशङ्कम्। एतेनैव कपिपरमाणुना तावदेवमनुष्ठितम्। एवं परःशताः कोद्यः श्रूयन्ते सम्प्रति सुग्रीवभुजबलपरिपालिते कपिसर्गे॥

त्रिज। सवितर्कम्। कहं तारिसी सुउमारदंसणा बि सुसिणिद्ध ब्बाहारा बि माणुसी बि सीदा अह्माणं रक्खसाणं बि र-क्खसी जादा।

माल्य। वत्से युज्यते ऽपि।

पतिव्रतामयं ज्योतिः शान्तं दीप्तं च घुष्यते।

विम्टश्य। अथवा किं नाम सा वराकी।

दुष्कर्म्मणां परीपाकः स्वयमेवैष दीप्यते।

त्रिज। कणिट्ठमादामह पढमं क्खु दण्डकारसपेरन्तपरिट्ठिदबिबिहमह्वीहरप्पदेसेसु णिबासो ज्जेव अह्माणं रक्खसाणं बिहारा क्खु णिखिलम्मि जम्बुद्दीबे संपदं क्खु इह णअरे बि अक्खमो णिबासो का गइ को पड़िआरो।

माल्य। वत्से किमेवमतिकातरासि। पश्य

दुर्गोऽयं चित्रकूटस्तदुपरि नगरं सप्तधातुप्रकार—
प्राकारं दुस्तरैषा निरवधिपरिखाप्यब्धिरभ्रंकषोर्म्मि।

विम्टश्य। अथवा किमनेन।

दोर्दण्डा एव ह्यद्रिपुदलनमहासत्रदीक्षाः प्रतीक्ष्या
रक्षोनाथस्य। वामाक्षिस्पन्दनं सूचयन्। सव्यथम्।
किं नो विधिरिह वचनेऽप्यक्षमो दुर्विपाकः।

वत्से वत्सस्य कुम्भकर्णस्य निद्रागमसीम्नः कियदवशिष्टम्।

त्रिज। कणिट्ठमादामह अस्सिं ज्जेव कसणचउद्दसीदिअहे चउट्ठ मासो परिसमत्तो।

माल्य। कथमद्यापि विप्रकृष्टतमः किल प्रबोधकालः।

सस्मरणम्। विम्टश्यमाने तु दिष्ट्या कनिष्ठवत्स एव दूरदर्शी यस्याविम्टश्यकारितापि शुभोदर्का सुबकृशोऽप्यभिसन्धीयमाने कुलप्रतिष्ठातन्तुं तमेवात् पश्यामि॥

त्रिज। ससम्भ्रमम्। कणिट्ठमादामह हद्धी हद्धी सन्तं पाबं पडिहदममङ्गलं।

माल्य। किमिति।

चिज। कणिट्ठमादामहस्स अत्रं णअवअणोबसासो असस्सिं ज्जेव कस्सिं अमङ्गले ज्जेव बिसन्तो।

माल्य। वत्से नैतदनुसन्धायोक्तम्। एवं किलावसीयते।

यतः। न कुचाप्यन्यच प्रबलभवितव्यादयमहो
विशुद्धेवोत्पत्त्या पतति न च तत्पापधिषणा॥
यथा खैरं भ्राम्यन्निरवधि वियत्यस्तशिखरं
व्युदस्यायं भास्वांस्तदनुगतघस्राचिरपि सा॥

तदच प्रतीकारेषु केवलं मतिसन्धानजृम्भितमवशिष्यते। कृतमनेन। वत्से अवैषि किमुपक्रमस्तावद्देवो दशकन्धरः॥

चिज। कणिट्ठमादामह सामी क्खु संपदं सब्बतोभद्दं णाम अट्टालअं आरुहिअ तीए रक्खसकुलकालरत्तीए अधिट्ठिदं असोअबणिअं ज्जेव पलोअन्तो चिट्ठदि। अस्स अ दुहिमुहं पउत्ताए एसा पउत्ती सुदा एदं णअरबुत्तन्तं अणुहविअ किं बि दुम्मणाअन्ती सामिणी बि पडिबोहेदुं तहिं ज्जेव पत्थिदेत्ति॥

माल्य। वत्से स्त्रीत्वे ऽपि वरं सा खलु देवी मन्दोदरी यन्मतिः प्रतिबोधनायोत्तास्यति। न पुनर्देवो यः प्रतिबोधितो ऽद्यापि न बुध्यते तदेहि तावदभ्यन्तरं प्रविश्य प्रणिधिकार्यं विचारयामः॥

इति निष्क्रान्तौ।

॥ विष्कम्भकः ॥

॥ ततः प्रविशति सोत्कण्ठो रावणः॥

रावणः। सीतां विभाव्य
मुखं यदि किमिन्दुना यदि चलाञ्चले लोचने
किमुत्पलकदम्बकैर्यदि तरङ्गभङ्गी भ्रुवौ।
किमात्मभवधन्वना यदि सुसंयताः कुन्तलाः
किमम्बुवहडम्बरैर्यदि तनूरियं किं श्रिया॥

सस्मरणोल्लासम्। अहो हलमुखविनिर्भिन्नविश्वम्भराविर्भूतयोषि-
द्रत्न मनुभवता मम मनोरथेन चिराय फलितम्। विमृश्य।
अनुकूलस्य विधेः किलायं विश्वासः। सगर्व्वम्। अथवा
कएष विधिरपि।

पिष्ट्वा ब्रह्माण्डमस्मादथ भुवनविभागादुदस्यापि किञ्चिद्
ब्रह्माणं चाधिकृत्याप्रतिमरुचितरं स्वं प्रतापं यशश्च।
सूर्य्येन्दू संविधाय स्वयमधिकतरं निर्वृतः स्यामहं चे
न्न स्यादालस्यदोषः सकरुणमथवा कोनुकम्प्येषु कोपः॥

॥ ततः प्रविशति मन्दोदरी चेटी च॥

चेटी। इदो भट्टिणी एदं अ राअअसोबाणमग्गदुआरअं ता आरोहदु भट्टिणी।

मन्दो। सोपानारोहणं नाटयित्वा रावणं निरूप्य। कहं एसो महाराअदसकन्धओ उबट्ठिदो बट्टदि। निर्वर्ण्य। कहं असो-अबणिआसम्मुहं पलोएदि। सखेदम्। कहं ईरिसे बि रिउबक्खा-हिओए संबुत्ते राअकज्जाणबक्खो लक्खीअदि महाराअद-सकन्धओ त्ति। उपसृत्य। जेदु जेदु महाराअदशकन्धओ॥

रावणः। आकारसंवरणं नाटयित्वा कथं मन्दोदरी। इति पार्श्वे समुपवेशयति॥

मन्दो। तथा कृत्वा। महाराअ किं एत्थ चिन्तिदं।

राव। कुत्र।

मन्दो। रिउबक्खआहिओए।

राव। सोत्प्रासम्। कथं रिपुस्तत्पक्षस्तदभियोगश्चेत्यश्रुतं श्रा-व्यते देव्या।

योऽहं द्वाभ्यां भुजाभ्यां मृधभुवि युगपन्मत्तदिग्दन्तिदन्तान्
बद्ध्वा दोर्भिश्चतुर्भिः सरभसमजितान् दिक्पतीनप्यरौत्सम्।

दीप्यद्वज्रादिचण्डप्रहरणपतनक्षुस्ववक्षस्त्वचो मे
तस्यापि प्रातिभाव्याद्रिपुरिति कलितः कोप्यपूर्व्वः प्रमादः॥
भवतु तथापि श्रोतव्यं देवि स कः ॥

मन्दो। णिखिलबलीमुहचक्काणुगदसुग्गीबाग्गेसरो सहकणिट्ठो दासरही रामो त्ति सुणीअदि।

राव। किं सहानुजस्तापसः। देवि किं गतेन तेनैवी सः।

मन्दो। महाराअ समुदाओ क्खु संकीअदि। अबरंअ साअरबेलासु सेणं बिणिबेसिअ आक्कदो णेण साअरो ण णिग्गदो भबणादो तदा तु संस्कृतमाश्रित्य ॥

प्रायुङ्क्तास्त्रं स किञ्चिज्जलनिधिकुहरे यन्महिम्ना क्षणार्द्धा
दाष्टत्त्रप्राष्टत्त्र चक्रभ्रममखिलमभूत् क्वाथतः शोणमम्भः।
उन्मूर्च्छन्नक्रचक्रं झटिति परिदलत्कच्छपौघं प्रमुह्यद्—
भूयःपाथोमनुष्यं स्फुटदतुलरवं प्रस्फुटच्छङ्खशुक्ति ॥

राव। सावज्ञम्। किं ततः।

मन्दो। महाराअ अदो अ पुंखमेत्तपेक्खिज्जमाणतिक्खसरणिअरपज्जलिदसरीरेण णिक्कमिअ सलिलादो सबादबड़्णं अब्भत्थिअ मग्गो उबदिट्ठो साहसिएण उण तेण] साहिज्जबित्ती सुणीअदि।

राव। सहासम्। अस्तु श्रूयते। देवि कीदृशः।

मन्दो। महाराअ बलीमुहसहस्साणीदेहिं महीहरेहिं सेदु णिम्मीअदि।

राव। देबि विप्रलब्धासि केनचित्। अकलितगाम्भीर्य्यमहिमा किलायं पाथोनाथः।

जम्बुद्वीपे ऽथ वान्येषु द्वीपेष्वपि महीधराः।
यावन्तस्तैः कुक्षिकोणो ऽप्यस्य न भ्रियते किल ॥

अपिच। साहसिकेनेति वदन्त्या देव्या विस्मृतप्रायं मत्साहसे तु
उत्पुष्यज्जलधमनिस्फुटप्रसर्पत्
प्रत्यग्रक्षतजझरीनिवृत्तपाद्यः।
हर्षाश्रुप्रचुरमधुस्रितस्फुटश्रि
वक्त्राब्जार्चितचरणः शिवः प्रमाणम्॥

मन्दो। महाराअ ओधारेहि किं वि असारिसी रअणा
कस्स वि बलीमुहस्स हत्थपुससदो उवरि ज्जेव चिट्ठंदि ते
महीहरा जलम्मि त्ति।

राव। सशिरःकम्पम्। इदं तदप्रतीकार्य्यं मौग्ध्यमबलानां
यद्ग्रावाणोऽपि प्लवन्त इति। देवि किं बहुनोक्तेन
श्रुतं मे जानाति श्रुतिकविरथाह्नां सहचरः
स शच्या धैर्य्यं चाशनिरथ यशोऽदस्त्रिभुवनम्।
बलं कैलासाद्रिः किमपरमहो साहसमपि
क्षरत्कीलालाम्भःस्नपितचरणः खण्डपरशुः॥

॥ नेपथ्ये महान् कलकलः॥

मन्दो। महाराअ परित्ताहि परित्ताहि। इति सत्रासमुदी-
क्षते।

राव। देवि अलं शङ्कया।

॥ पुनर्नेपथ्ये॥

भोभो लङ्काद्वाररक्षिणो राक्षसगणाः
दत्त द्वाराणि तूर्णं सरलतरगुरूण्यश्मसारार्गलानि
क्षिप्यन्तां शस्त्रजातं तदुपरि नयत खान्वयांश्चावधत्त॥
रुध्यध्वं निर्विघ्नासून् शिशुयुवतिजनान्वीवधांश्चाद्रियध्वं
प्राप्तः सुग्रीवमुख्यप्लवगपरिवृतः सानुजो रामभद्रः॥

॥ नेपथ्याद्भिं प्रविष्टा प्रतीहारी ॥

प्रतीहारी। भट्ट एसो पडीहारभूमिए चिट्ठदि सेणावइ पहत्थो- त्थिसबिदुकामो।

राव। कथं सेनापतिः प्रहस्तः। प्रवेशय।

प्रती। तथा। इति निष्क्रान्ता।

॥ ततः प्रविशति प्रहस्तः ॥

प्रह। अहो मनुष्यपोतस्य तावदत्यूर्ज्जस्वलं चरितम्।

तथाहि। भीमं गोष्पदवद्विलङ्घ्य परितः कल्लोलमालाकुलं
पाथोनाथमुपेत्य मन्थरतरं लङ्कानिबद्धेक्षणः।
स्कन्धावारमसौ निवेश्य विषमे सौवेलमूर्द्धि स्वयं
कैश्चिद्वानरपुङ्गवैः परिवृतोऽध्यास्ते पुरः प्राङ्गणम्॥

पुरो निरूप्य। कथमयं लङ्केश्वरः।

राव। भद्र सेनापते किंहेतुरयं कलकलः।

प्रह। स्वगतम्। कथमद्याप्यनभिज्ञ एव देवः। भवतु कार्यक्रमाचं विज्ञापयामि। प्रकाशम्।

पुरं निःशेषघटितं कपाटद्वारमाहृतम्।
रक्षा चाप्तैर्भक्तिमद्भिः कौणपैः परितः कृता॥

राव। किमिति।

प्रह। स्वगतम्। कथं सैवावस्था। भवतु। प्रकाशम्। देव लङ्केश्वर। मनुष्यपोतमात्रेण सानुजेन पुरी तव।
रुध्यते स्म यथासारं वीवधाद्यपि दुर्लभम्॥

॥ प्रविश्य प्रतीहारी ॥

प्रती। भट्ट एसो कोबि वलीमुहो रामस्स दूदो त्ति भणिअ पडी- हाअदेसे चिट्ठदि॥

राव। सावज्ञम्। वलीमुखः। प्रवेशय॥

प्रती। तथा। इति निष्क्रम्याङ्गदेन सह प्रविश्य। तं प्रति।
एसो भट्टो उपसप्प।

अङ्ग। उपसृत्य। जयति जयति परममाहेश्वरो लङ्केश्वरः।

राव। सुग्रीवानुचरो भवान्।

अङ्ग। नहि नहि।

राव। तर्हि कस्य।

अङ्ग। लङ्केश्वर श्रूयतां योऽहं यदर्थमागतश्च।
दृप्यद्राक्षसचक्रकाननमहादावानलस्याज्ञया
दूतो दाशरथेस्तदीयवचसा त्वामागतः शासितुम्।
सीतां मुञ्च भजावरोधनसुहृद्दायादपुत्रान्वितः
सौमित्रेश्चरणौ नचेत्तदिषुभिः शासिष्यसे दुर्मदः॥

राव। सहासम्। बलीमुखोऽपि वाचाटः किं वक्तव्यम्।

अङ्ग। अहं यत् किञ्चित् स्यां त्वन्तु सिद्धान्तमेवावधारय।
तत्पादाब्जनखं किं वा तत्तीक्ष्णेषुमुखं नताः।
स्फुटारत्नेऽद्य मूर्द्धानस्तवोरभिमतं वद॥

राव। सक्रोधम्। कः कोऽत्र भोः यत्किञ्चिद्वादिनोऽस्य मुखं
संस्कुर्यात्।

प्रह। देव दूतः किलायं किमत्र क्रोधेन।

राव। एतन्मुखसंस्कारएव तपस्विनः प्रत्युत्तरीकरणम्।

अङ्ग। उद्रोमकूपस्फुरणमभिनीय।
ययासङ्ख्यं तीक्ष्णक्रकचविषमक्रूरनखर
प्रगल्भव्यापारप्रमथितशिरोबन्धशिथिलैः।
शिरोभिस्ते दिग्भ्यो बलिमनुपहृत्यैव किमहं
निवर्त्ते यत् स्यां चेन्न रघुपतिदौत्येन परवान्॥

॥ इत्याप्लुत्य निष्क्रान्तः॥

राव। निरूप्य। अहो जातिसुलभं चापलमप्रतीकार्य्यम्।

प्रह। देव निदेशाद्वरमालिकापरिग्रहायोत् कण्ठते हृदयम्।

राव। किमद्यापि प्रष्टव्यो निदेशः।

चोद्यन्तामभितो ऽर्गलानि भुवनप्रख्यातसारोद्धतैः
पाद्यन्तां परितोरणानि च परव्याक्षेपिभी राक्षसैः।
मथ्यन्तां रिपुघस्मरप्रहरणं विक्षोभ्य मङ्क्षा भुजाः
खण्ड्यन्तां च मुकुर्विवलगनदृष्टोत्थानोत्कटा मर्कटाः॥

प्रह। यदाज्ञापयति महाराजः इति निष्क्रान्तः।

॥ नेपथ्ये महान् कलकलः॥

सर्व्वे। ससंभ्रममाकर्ण्यन्ति॥

॥ पुनर्नेपथ्ये॥

वध्यन्ते ऽश्वपपुङ्गवाः प्रतिभयाभोगैः प्लवङ्गाधिपै
र्वध्यन्ते च वितर्द्दिकाः प्रतिदिशं क्षत्त्रैरदोमूर्द्धभिः।
छिद्यन्ते च वहिः प्रपित्सव इमे मध्ये क्रुधान्धाः क्षणाद्
भिद्यन्ते पुरगोपुराः प्रतिदिशं चिप्तैश्च गण्डोपलैः।

राव। ऊर्द्ध्वमवलोक्य सक्रोधमुत्प्रेक्ष्य च। कथमेते तपस्विपक्ष-
पातादनात्मज्ञा वासवपुरःसरा दिवौकसोऽपि मत्सरिणो
विक्षुभ्यन्ते। तद्देवि त्वमभ्यन्तरे प्रविश। अहमपि तावत्।

कैश्चिद्दोर्भिः प्रमत्तान् प्लवगपरिदृढान् दिक्षु विक्षिप्य दक्षै
रन्यैः पिष्ट्वापि युद्धाभिनयविधिनटौ तौ तपस्विप्ररोहौ।
शिष्टैः कृत्वा स्वचेतःप्रतिफलितदृथारम्भमाचप्रविष्टान्
दृष्टांस्त्रैविष्टपानप्यपगतकरुणस्तैर्बिभर्म्मि स्वकाराम्॥

॥ इति विकटं परिक्रम्य निष्क्रान्तः॥

॥ ततःप्रविशति रथेन सपरिवारो वासवः सूतश्च मातलिः॥

मात। देव दिवसते यथा तावदधिलङ्घमेषः

संवर्त्तप्रकटविवर्त्तसप्तपाथो
नाथोर्म्मिव्यतिकरविभ्रमप्रचण्डः ।
निर्घोषः स्फुरति भृशं परःसहस्र
व्यावल्गत्प्रबलगतागतास्त्रपाणाम् ॥
तथा तर्कये युयुत्सया निर्यियासति नक्तञ्चरचक्रवर्त्तीति ।

वास । सूत पश्य पश्य
दृढतरमभियोगं वीक्ष्य रक्षोविनेता
सह तनुजसगर्भप्रेष्यरक्षःसहस्रैः ।
सरभसमरराणि द्रागपाहत्य विद्रा—
वितनिखिलवनौका निर्गतोऽयं नगर्याः ॥

शब्दश्रवणं नाटयित्वा । आः क एषः कौवेर्याः ककुभः क्वणत्-
कनककिङ्किणीजालमालिना विमानेन सरभसमितएवाभ्येति ।

सूत । निर्वर्ण्य । देव भवतैव गन्धर्व्वराज्याधिपत्याभिषिक्त—
कृतमहाप्रसादश्चित्ररथः ।

॥ ततः प्रविशति विमानाधिरूढश्चित्ररथः ॥

चित्र । जयति जयति देवराजः ।

वास । गन्धर्व्वराज समरदिदृक्षानिर्भरं किं चेतः ।

चित्र । तदप्यन्यदपि ।

वास । किमन्यत् ।

चित्र । अलकेश्वरनिदेशः ।

वास । कीदृशः ।

चित्र । दुर्बाधो जनिदिवसान्मम प्ररूढः
कोऽप्याधिः प्रबलतमोऽथवा त्रिलोक्याः ।
तस्येदं निधनदिनं विधेर्विलासात्
कल्याणी परिणतिरस्तु वान्यथा वा ॥

तदवगन्तुमहं प्रहितः ।

वास । सकुल्यानामप्येष मनोरथः ।
चित्र । किं चित्रं सहजाः किल ते मिथः शत्रवः
क्वचिमतापि निधिपुष्पकादिहरणवृत्तैर्दृष्टं तस्य सुप्रथिता ।
अथवा । यावत्त्रिलोक्यं किल जन्तुजातं
तत् सर्व्वमस्योद्धतदुश्चरित्रैः ।
कदर्थितं श्रीरघुनन्दनस्य
प्रीत्या विधत्ते विजयप्रतीक्षाम् ॥
वास । निरूप्य । गन्धर्व्वराज यदिदमधित्यकातः सुवेलाद्रेरकाण्ड एव प्रबलकिलिकिलाकोलाहलमुखरितहरिन्मुखं वलीमुखचक्रमक्रममेवोच्चलितम् तथा मन्ये पतितमेव प्रहरणैरिति ।
चित्र । देवराज पश्य पश्य
अयं रक्षोनाथः क्षितिधरशिरोबन्धुरतरे
रथे तिष्ठन् प्रष्ठः प्रधनरसनिष्णातमनसाम् ।
मुञ्जर्ज्यावाघोषैर्बधिरयति दिक्प्रान्तशिखरि-
प्रतिध्वानाध्मातैर्गगनविवराभोगमभितः ॥
वास । गन्धर्व्वराज न तुलाधृतस्तावदनयोर्व्वीरसमयोचितः परिकरः । सावेगम् । सूत सूत सांग्रामिकं मे रथमुपहर रामभद्राय । अहमपि गन्धर्व्वराजाधिष्ठितं विमानमेवाधितिष्ठामि ।

॥ तथा करोति ॥

सूतः । यथाज्ञापयति देवराजः । इति निष्क्रान्तः ।
चित्र । देवराज कथमतिसन्धेयं तुमुलम् । तथाहि ।
रक्षोभिर्व्विपिनौकसां परिवृढैश्चारादपास्तक्रमं
मुष्टामुष्टि कचाकचि प्रहरणप्रक्षेपमूढात्मभिः ।
प्रारब्धं रणकर्म्म दुर्द्धरमिथोनिष्पेषशौर्य्यद्रयु-
र्निष्ठ्यूतास्रझरीभिरेव सरणि र्दुःसञ्चराभूद्यथा ॥

अपिच। वीराणां रुण्डतुण्डप्रविघटनपटुस्फारदोर्दण्डखण्ड
व्यापारक्षिप्यमाणप्रतिभटविकटाटोपवर्म्मप्ररूढः।
कूटः कोऽप्येष युद्धाजिरभुवि जरठश्विचकूटानुकारी
लीयन्ते यत्र शत्रुप्रपतनविवशाः कोटिशः शूरकीटाः॥

वास। गन्धर्वराज इत इतः॥
प्रासप्रोतप्रवीरोल्बणरुधिरपरामृष्टवृक्काजिघत्सा
धावद्गृध्राधिराजाप्रतिमतनुरुहच्छायया वारितोष्णाः।
विश्राम्यन्ति क्षणार्द्धं प्रधनपरिसरेष्वेव मुक्ताभियोगा
वीराः शस्त्रप्रहारव्रणभररुधिरोद्गारदिग्धाखिलाङ्गाः॥

इतोऽपि। प्रतीक्षन्ते वीराः प्रतिमुखमुरोभिः सरभसं
विपक्षाणां हेतीः प्रतिनियतधैर्य्यानुभवतः।
विदीर्सत्वग्भारादलितपिशिताच्छिन्नधमनि
प्रकाण्डास्थिस्नायुस्फुटतरविलक्ष्यान्त्रनिवहाः॥

चित्र। देवराज अपूर्व्वोऽयं रक्षःपतेः संग्रामावतरणसर्गः।

तथाहि। प्रेक्ष्याः संग्रामसीमन्यनुजशतवृतो मेघनादोऽपि पार्श्वे
वामे ऽन्यत्र प्रवीरेष्वतिविषममदोदबोधितः कुम्भकर्णः।
कैकस्या बन्धुवर्गोऽप्ययमतिविकटः पृष्ठतस्तिष्ठमानो
ध्वान्ते मध्ये निषण्णो रथशिरसि भृशं विन्ध्यवद्दुर्विगाहः॥

वास। गन्धर्वराज एवमभियोगोद्धुरं द्विषन्तमभिवीक्ष्यापि निष्प्र-
कम्प एव रामभद्रः। अथवोचितमेवैतत्। यतः
न कम्पन्ते झञ्झामरुति किल वाति प्रतिदिशं
समुन्मूर्च्छत्सारा: कुलशिखरिणः किञ्चिदपि ते।
न मर्य्यादां तेऽपि प्रतिजहति गाम्भीर्य्यगरिम
स्फुरद्वार्ब्रह्माणोऽकलितमहिमानो ऽम्बुनिधयः॥

चित्र। देवराज पश्य पश्य।

भक्तिप्रह्वं कथमपि यवीयांसमुतसृज्य चापा-
रोपव्यग्राङ्गुलिकिसलयं मेघनादक्षयाय ।
लक्षीकृत्य प्रधनकुशलं सानुजं राक्षसेन्द्रं
जीवां भूयो रघुपतिरिषा स्पर्शतः संस्करोति ।
कथमेतदतिदुष्करमिव मन्ये । तथाहि ।
आक्रम्यैकैकमेते रजनिचरभटाः कोटिशः शस्त्रवर्षैर्
अखिद्यं शम्प्ररोहं पिदधति परितः सत्क्रियायौगपद्यात् ।
अथवा किंनाम दुष्करम् ।
एतावप्युत्प्रभावावकलितमहिमप्राभवौ युद्धभूमा
विन्धाते शत्रुशस्त्रप्रविदलनफलस्पष्टवाणाभियोगौ ॥
समन्ततोऽवलोक्य । अहो कथमेते वनौकसोऽपि महति सप-
त्नसङ्करे स्वाभिधानयोगमेव ख्यापयन्तः पक्षपाः केवलं राम-
भद्रपादमूलमासेवन्ते ।
तथाहि । सुग्रीवः स्यन्दनस्याग्रे सोऽङ्गदः पृष्ठतः पुनः ।
पक्षपा जाम्बवान् भावी लङ्काधीशोऽपि पार्श्वयोः ।
विचिन्त्य । हनूमान् पुनः कनीयांसं काकुत्स्थम् । सविमर्षम् ।
वरमेत एवोभयथा रामभद्रपादपद्मोपसेविनः । यतस्ता-
वदेतेषाम्
स्वामिभक्तिश्च धैर्यञ्च व्याख्याते गाचमक्षतम् ।
रक्षोऽभियोगस्त्वन्येषां दृश्यते दैन्यमप्यलम् ॥
वास । गन्धर्वराज मानुषे लोके वातसल्यं नाम केवलमखिलेन्द्रिय
वशीकरणचूर्णमुष्टिः । यतः
सौमित्रिः कृतहस्तताप्रभृतिभिर्नूनं नो न कैश्चिद्गुणैः
सारेणापि पुनः प्रसिद्धमहिमा शौर्याग्रणी रावणिः ।
इत्थं तुल्यतरे किल व्यतिकरे रामस्य रक्षःप्रभो
स्वान्योन्यं शरदृष्टिरिव वलते दृष्टिस्तयोर्वत्सला ॥

चित्र। देवराज युक्तमेवैतदेवं वात्सल्यमनुरुन्धन्ते किल
महात्मानः। साङ्कूतौत्सुक्यम्। पश्यतु देवराजः।
सौमित्रेर्वाणवज्रैरधिकतरममी मर्म्मवेधं प्रविद्धाः
धावन्तः क्ष्माधरेन्द्रा इव रजनिचराः शेरते युद्धसीम्नि।
रक्षोनाथोऽपि पुत्रान् कतिचन पतितान् वीक्ष्य रामाभियोगं
संत्यज्यानिष्टशङ्की निपतति तरसा मेघनादोपकण्ठम्॥
तदेतदत्याहितमाशङ्के।

वास। गन्धर्वराज किमत्र नामात्याहितम् अपरिच्छेद्यमहिमानः
किलैते ककुत्स्थकुलप्ररोहाः। तथाहि
परःसहस्रं रजनीचरेन्द्रा यथास्य वीरस्य किलैकलक्ष्यम्।
तथा रणेष्वद्भुतवीरगोष्ठीभूषायमाणो दशकन्धरोऽपि॥

चित्र। देवराज बहुभिरेकस्याभियोगेऽपि शुभोदर्कतेत्येतदबद्ध
व्यक्तिनिष्ठम्। सचमत्कारम्। इतोऽवधत्तां देवराजः।
रक्षोनाथे सरभसमितो निर्गते विग्रहेच्छुः
क्षुभ्यत्युच्चै रघुपतिशरैः कीलितः कुम्भकर्णः।
कुम्भोऽप्येतां पितुरुपनतां वीक्ष्य वस्थां वपुष्मान्
गर्व्वैः किं वा निपतति जवाज्जङ्गमः क्ष्माधरेन्द्रः॥

साद्भुतम्। अहो छिद्रसञ्चारिता मर्कटजातेः। यतः
उद्दिश्यारादिशरथकुलाङ्कूरमाद्यं पतन्तं
सद्यः कुम्भं न्यधभुवि कपिः कोऽपि मध्ये रुरोध॥
सविशेषं निर्वर्ण्य। कथं सुग्रीवएव। सविचिकित्सम्।
दोस्तम्भाभ्यां सरभसमथापीड्य विक्षिप्य भूमौ
क्रान्त्वाप्येनं प्रतिघविवशो माषपेषं पिपेष॥

साशङ्कम्। एतन्निरीक्ष्य निपपात च कुम्भकर्णः
सुग्रीवमुग्रतरविद्रुतिरग्रहीच्च।

उन्मोच्य सोऽपि निपुणः स्वममुष्य नाशां
लज्जां स्वसुश्च युगपत् किल निष्प्रकर्त्त ॥

राम। गन्धर्वराज इत इतः।
लघुरघुपतिरेष राक्षसाणा
मधिभुवि किञ्च कुमारमेघनादे।
किमपि चरितमद्भुतं व्यतानीत्
सपदि यथा प्रतिघान्धतामधत्त।

अहह। इदमतिदुष्करं प्रतिसंविधानमापतितमस्य रघुशिशोः।
तथाहि। यावन्मन्त्रप्रभावादनधिगतगतीन् मेघनादप्रणुन्नान्
दुर्भेद्यान्नागपाशान् विहगपरिवृढास्त्रप्रयोगादव्यधूनोत्।
तावद्रक्षोविनिघ्ना पुनरतिरभसं मर्म्मणि क्रोधभूम्ना
गाढं विद्धः शतघ्न्या हनुमति सहसा मोहनिघ्नो न्यपप्तत् ॥

चित्र। देवराज अयमत्यद्भुततरो विमर्द्दः। यदा तु भ्रातुर्मोह मधिगम्य भाविलङ्केश्वरादक्रममेव करुणवीरानुभावभावित चित्तवृत्तिस्तथाविधस्यापि दर्शनोत्सुकः समवरुद्ध्यत परितः कुम्भकर्णप्रमुखया रक्षःपृतनया तदा पुनरिदमेव प्रत्यकार्षीत्। तथा हि

पुरां जेता पूर्व्वं त्रिपुरविजये यामुदवहत्
स्थितिं तामेवायं रघुपतिरुपाश्रित्य वपुषा।
क्षणाद्रक्षोनाथानुजमिषुभिराच्छिद्य करणश्च
स्वमं भस्मीकृत्याप्यनुजमभियात्युत्सुकतमः ॥

निर्वर्ण्य। अहो वात्सल्यमहिमा रघुपुङ्गवस्य। येन पुनर्विषयीकृतमात्रामेवानुजस्यावस्थामभिजानाति स्म ॥ परितो निरूप्य। सहर्षम्। दिष्ट्या स्वस्ति रघुकुलकुमाराभ्यामेताभ्यामुत्पश्यामि। यतस्तावदेतयोरस्मिन्ब्रासनमहार्णवे यातुधानाधीशेनापि सपरिवारेण कुम्भकर्णवधात् सम्भ्रान्तम् ॥

पुनरेतौ निर्वर्ण्य ॥ कथमद्यापि प्रमुग्धावेव विषमो ध्वान
व्यतिकरस्तावदापतितः । यतः ।

बहुच्छलानि रक्षांसि रिपवस्त्ववशः स्वयं ।
एषावस्थापि कपयः सहायास्तेऽपि विह्वलाः ॥

तत् किमुपक्रमं दैवमचेति न जाने ॥
वास । गन्धर्वराज किमेवमाशङ्कसे । पश्य । जीवतप्रतिबोधितः
किलायमचिन्त्यमहिम्नां प्रथमः प्राभञ्जनिः । सम्प्रति
उत्स्फूर्ज्जद्रोमकूपः प्रलयपरिमिलत्पांशुवर्षानुकारी
किञ्चिद्भुग्नाग्रपुच्छाप्रतिमविचलनापास्तनक्षत्रचक्रः ।
भूम्नौत्सुक्यानुरूपव्यवसितिरधिकं पर्य्यवप्लुत्य गत्वा
क्वापि प्राज्ञः क्षणार्द्धात् कमपि गिरिमसावाहरन्नाजगाम ॥
चित्र । विभाव्य सोल्लासम् ॥ देवराज पश्य ।

यथा चन्द्रालोकं कुमुदनिवहश्चुम्बकमणिं
दृषत्सारस्तत्त्वामृतमपि भवाम्भोनिधिगतः ।
तथा सम्भाव्यैतौ हनुमदुपनीताद्रिमरुतं
झटित्युज्जृम्भेते किमपि गहनो वस्तुमहिमा ॥

दक्षिणतो विभाव्य । कथमेष लङ्केश्वरः । कल्पावसाननिर्म्मर्य्यादं
पाथइव पाथोनाथस्य राक्षसबलमाकर्षन् पुनरभ्यमित्रमेति ॥
विमृश्य । सम्प्रति तु धर्म्मयुद्धसम्भावनाप्रतिहतबहुतरप्रधानव्यक्ति
रावणमेघनादशेषमेतद्राक्षसबलमेताभ्यामवगणितमित्येताव-
प्युभौ न गणयन्ते परःसहस्रमप्यस्रपकीटाः । पुनर्लक्ष्मणं
निर्वर्ण्य । एवं तु

शाणोत्कीर्णो मणिरिव घनाम्भोदमुक्तो विवस्वा
न्निःकोशोऽसिर्झटिति विगलत्कञ्चुकः पन्नगेन्द्रः ।
दीव्यत्युच्चैर्लघुरघुपतिः किन्नु वा स्यात् किमन्यद्
दिव्यौषध्या जयति महिमा कोऽप्यचिन्त्यानुभावः ॥

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000107

निरूप्य । कथं प्रक्रान्तमेव कपिराक्षसनासीरचरयोर्भटयोः पुन-
रायोधनम् । तथाहि

शितैर्वाणैरेके मृधभुवि परे तीक्ष्णनखरैः
क्रियासातत्येनाप्यहमहमिकाक्रान्तमनसः ।
मिथो विध्यन्ति स्म प्रबलतमसम्मर्दविदलत्-
क्षितिक्षोदः पिष्टातकसुरभिवक्षस्तटभृतः ॥

सशिशेषं निश्चित्य । तावदन्तरमनयोर्बलयोरधिगम्यमानं प्रातः
सन्ध्यायां यावदन्धतमसारुणालोकयोः । तथाहि,

प्रतिक्षणमियं रक्षःपृतना क्षीयतेतराम् ।
यथा तथा प्लवङ्गानामनन्तगुणतैधते ॥

वासव । गन्धर्वराज पुनरितो महत्कदनमुपक्रान्तम् ।

रक्षोनाथो रघूणां त्वरितमधिभुवा रावणिर्लक्ष्मणेन
द्वन्द्वीभूय प्रहृष्यद्भुजबलमहिमाविष्कृतेष्वासशिक्षौ ।
दिव्यास्त्राणां प्रयोगप्रतिकृतिमुचितां चाप्नुवानौ मिथोऽमू
मूर्च्छत्कल्पावसानज्वलनपरिभवं सैन्ययोः पर्य्यदाताम् ॥

चित्र । देवराज दुरवरोधोऽयमनयोर्महावीरयोर्मिथोविमर्द्दः ।
तथाहि ।

क्ष्वे डाभिः ककुभः पृषत्कनिकरैर्व्योम द्विधाखण्डितै
र्देहैर्विद्विषतां धरातलमपि प्रच्छादयन्तौ चिरम् ।
कुर्व्वातेऽस्रुजलाविलेक्षणपथान्येतावकाण्डाम्बर—
द्रोमाञ्चानि सवेपथून्यपि मुहुर्वर्ष्माणि नः पश्यताम् ॥

सविशेषं विभाव्य । कथं प्रत्यक्षानुमानाभ्यामुपलभ्यमानमेकमेव वस्तु
विप्रकृष्टान्तरं संपद्यते । तथाहि

अस्माद्रावणवृत्ताद्राघववृत्तं तु दशगुणं वीक्षे ।
अनुमन्येऽनन्तगुणं पार्श्वपतत्कौणपेन्द्रविनिपातैः ॥

परितो निरूप्य । सकुतुकाश्चर्य्यम् ।

यावन्तो रजनीचराः प्रहरणोद्घूर्णद्भुजाकेतवो
युध्यन्तोऽभिमुखाः स्फुरद्भुजमदाध्माताः पुरो निर्गताः।
प्रक्षिप्ताशुगजालपक्षपवनाधूते प्रतापानले
चित्रं दाशरथेः क्षणाच्छलभतां यान्ति स्म सर्वेऽपि ते ॥

सविमर्शम्। एवं किलेयं पाञ्चभौतिकी सृष्टिः।
त्रैलोक्यमप्यपर्याप्तं रक्षसां स्थातुमप्यदः।
येषां ते केवलं भूमौ विलिख्युः पञ्चतां गताः॥

वास। गन्धर्वराज पश्य विस्मयनीयविप्रलम्भौ किलामू राम-
रावणौ। यतः।
एताभ्यां राघवाभ्यां सकुतुकमिषुभिश्छिद्यमानेषु मूर्द्ध
स्वेकस्यैकोऽप्यनन्तः किमु सरसगुणौ वर्णनीयौ परस्य।
एतत्संपश्यतोरप्यतिचिरमनयोः कोऽप्यचिन्त्यः प्रभावो
यत्रोत्साहो न धैर्य्यं विरमति न शिरश्छेदतः पत्रिणोऽपि ॥

॥ नेपथ्ये ॥

भो भोः रामभद्र किमद्याप्युपेक्षसे दुर्वृत्तमेनम् कथं वैकक्रिया
साध्यमेतावन्तमर्थम्। अवधत्स्व तावत्
भवान् सीतां लोकस्त्रिभुवनगतः प्रीतिमुचितां
कनीयान्पौलस्त्यः पुरममरतां स्वां पुनरयम्।
किमन्यत्साक्षात्कृतपरमतत्त्वो मुनिगणः
प्रसादप्रोन्मीलन्मुदि मनसि शान्तिं च लभताम्॥

चित्र। निशम्य। कथमेष दिव्यर्षिगणोऽप्येतयोर्वधाय राघवौ
त्वरयति। अथवा दुष्टप्रशान्तिः कस्य न मनःप्रीत्यै॥ ससम्भ्र-
माङ्गतौत्सुक्यम्। देवराज पश्य
आभ्यां ब्रह्माच्युतास्त्रस्मरणसुरभिभिर्मार्गणै राघवाभ्यां
मूर्द्धानौ चिच्छिदाते रजनिचरपते रावणस्य क्रमेण।

पश्चाद्रक्षःकबन्धौ मृधभुवि विवशः सोऽपि रक्षोऽवरोधः
क्षोण्यां श्रीदाशरथ्योः शिरसि च वियतः पुष्पवर्षं पपात ॥

वास। नेपथ्याभिमुखमवलोक्य। सोल्लासम्। गन्धर्वराज पश्य तावदेते किल त्रिभुवनशत्रोर्दशकन्धरस्य निधनवृत्तान्तश्रवणेन प्रमोदनिर्भराः सहमहर्षयः सुमनसः कमपि महोत्सवमनुबुभूषन्तो मामेव प्रतीक्षन्ते तद्गच्छाम्येतेषां मनोरथसम्पादनाय त्वमप्येतद्वृत्तान्तनिवेदनेन प्रियसखमलकेश्वरं प्रीणय ॥

॥ इति परिक्रम्य निष्क्रान्ताः सर्वे ॥

॥ षष्ठोऽङ्कः ॥

---

## सप्तमोऽङ्कः।

॥ ततः प्रविशति शोकाकुला लङ्का ॥

लङ्का। साक्रोशम्। हा महाराअ दसकन्धअ तेल्लक्कवीरलच्छीपडिग्गहदुल्ललिद हा सअलरक्खसलोअपडिबालणसमत्थदुम्मदभुअदण्ड हा पसुबइपादजुअलच्चणोबजुज्जन्तमुद्धमुहपुण्डरीअ हा केकसीपुत्ततिलअ हा बन्धुअणबच्छल कहिं मए तुमं पेक्खिदब्बो हा कुमार कुम्भअस हा बच्छ मेहणाह कहिं सि देहि मे पडिबअणं। परितो विलोक्य। कहं कोबि ण मन्तेदि। ऊर्द्ध्वमवलोक्य। हा दुट्ठदेब्बदुब्बिलसिअ कीस एब्बं परिणदं सि अहबा को एत्थ भवदो उबालम्भो अत्तणो एब्ब दुच्चरिदं एदं बिपरिणमेदि ॥ इति सानुक्रोशं रोदिति ॥

॥ ततः प्रविशत्यलका ॥

अल। अहो कथमस्य रक्षःपतेरपूर्व्वः कोऽप्ययं दशापरिपाकः। यदेतावानपि रक्षःसर्ग्गः क्षणेनैव विभीषणमात्रशेषः संवृत्तः; शब्द श्रवणं नाटयित्वा परिक्रम्य। कथं कनीयसी मे भगिनी प्रत्यग्रभर्त्तृविरहव्यथाविधुरा क्रन्दन्ती लङ्का। उपसृत्य। भगिनि समाश्वसिहि समाश्वसिहि॥

लङ्का। विभाव्य कहं बहिणिआ मे अलआ।

अलका। भगिनि समाश्वसिहि समाश्वसिहि। एवं किलेयं लोकयात्रा।

लङ्का। अयि बहिणिए कुदो मे आस्सासो, जुबइजणमेत्तसेसा सम्वुत्त ह्मि, एको उण कुलतन्तू कुमारबिहीसणो क्खु चिट्ठदि त्ति सुणीअदि, सोबि मन्दभाइणीए अधसदाए रिउबक्खं जेब्ब सेवदि।

अलका। अयि भगिनि मामैवं, न खल्वस्माकं स रिपुपक्षः।

लङ्का। कहं बिअ।

अलका। यस्य रिपुः स गतस्तच्च गतं, संप्रति तु निसर्ग्गसुहृदस्माकं त्रिभुवनप्रसिद्धसम्बन्धो दाशरथिः।

लङ्का। आश्वस्य। कहं ईरिसो बि।

अलका। ईदृश एव।

लङ्का। कहं अह्म सामिसु ईरिसो बिपरिणदो।

अलका। अप्यननुसन्धाने किमेवं भाषसे। शृणु।

रघुकुलतिलकेऽस्मिन् भ्रातृमात्रद्वितीये
किमपि पितृनिदेशाद्दण्डकां संप्रविष्टे।
यदुचितममुना ते राक्षसानां विनेत्रा
विहितमयमशेषः कर्म्मणस्तस्य पाकः॥

लङ्का। ऊं तुमं उण ईरिसे पत्थावे कहं एत्थ उबट्ठिदा सि।

अलका। अवधत्स्व अहं किल वैमानिकेन पौलस्त्येन गन्धर्व्वराजाच्चित्ररथादमुं वृत्तान्तमुपलभ्य शिष्टबन्धुप्रतिबोधनाय, विभीषणस्य च लङ्काभिषेकसाक्षात्करणाय, रावणापहृतविमानराजस्य पुष्पकस्य च रामभद्रोपस्थानोपदेशदानाय सन्दिष्टा।

लङ्का। अह्मो कहं भअबदो पसुबइणो बि मित्तं णिधाणाहिबई सअं एब्ब उबचरदि रामभद्दं।

अलका। अयि किमत्राश्चर्य्यम्।

इदं हि तत्त्वं परमार्थभाजा
मयं हि साक्षात् पुरुषः पुराणः।
त्रिधा विभिन्ना प्रकृतिः किलैषा
त्रातुं भुवि स्वेन सतोऽवतीर्णा।

लङ्का। कहं अह्म सामिणा रक्खसणाहेण एदं ण ओबधारिदं।

अलका। अयि सरले शापमहिम्ना किल मूर्च्छन्मोहः सोऽपि नापराध्यति।

। नेपथ्ये कलकलः।

उभे। ससम्भ्रममाकर्णयतः। पुनर्नेपथ्ये।

समवधत्त भोस्त्रिजगच्चराणि भूतानि।
वस्वर्करुद्रसहितः स्वयमेष साक्षा
दृद्धश्रवाः समभिनन्दति साधु साध्वीम्।
अग्निप्रवेशपरिनिर्गमशुद्धभावां
सीतां रघूत्तम भवत्स्थितिमाद्रियस्व॥

अलका। कथमेते दिवौकसोऽपि दशकन्धरगृहनिवासव्यसनकौलीनशङ्कापनुत्यै कृतपावकप्रवेशनिर्गमनां सीतादेवीमभिनन्दति। अहह।

पतिव्रतामयं ज्योतिर्ज्योतिषान्येन शोध्यत ।
इदमाश्चर्य्यमथवा लोकस्थित्यनुवर्त्तनम् ॥

लङ्का । शब्दश्रवणं नाटयित्वा । कहं मङ्गलतररबभिसारो गीदीओ णिसामीअन्ति ।

अलका । नेपथ्याभिमुखमवलोक्य । कथं सीताविशुद्ध्यनुमोदनार्थमवतीर्णाभिरप्सरोभिर्दिव्यर्षिगणैश्च रामभद्रनिदेशेन निष्पादिताभिषेककल्याणो विभीषणः पुष्पकं पुरस्कृत्य रामभद्रमभ्येति । तदेहि तथाविधसहजमहिममहनीयचरितमहानुभावावलोकनेन चक्षुः कृतार्थयाव ।

इति परिक्रम्य निष्क्रान्ते ।

॥ मिश्रविष्कम्भकः ॥ (१)

ततः प्रविशति पुष्पकं पुरस्कृत्य विभीषणः ।

विभी । अनुष्ठितः किल मया रामभद्रादेशः । तथाहि । सतृतं मातलिमनु ।

अजस्रगलदस्रसंस्रवकिणाङ्कगण्डस्थलाः
स्खलत्कनककङ्कणं नियमितैकवेणीभृतः ।
क्षमातलविवर्त्तनातिमलिनाम्बरा मोचिताः
प्रयान्ति किल सस्मिताः स्म सुरलोकवन्दिस्त्रियः ॥

उपहृत्य । जयति जयति रामभद्रः । देव एतदवसानः किल निदेशः सम्पादितः ।

वन्दीभिरेधिताः काराः शृङ्खलाभिरलङ्कृताः ।
कार्त्तस्वराभिर्हृष्टाभिः पताकाभिश्च साम्प्रतम् ॥

---

(१) संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ।
मध्येन मध्यमाभ्यांवा पात्राभ्यां संप्रयोजितः ।
शुद्धः स्यात् सतु संकीर्णो नीचमध्यमकल्पितः ॥

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000113

अयं च पुष्पकनामा स विमानराजः।

असंरुद्धगतेरिष्टप्रवृत्तेर्वशवर्त्तिनः।
मनोरथस्यानुगुणं सर्व्वदा यस्य चेष्टितम्॥

रामः। साधु लङ्केश्वर साधु सम्पादितम्। सुग्रीवं प्रति। सखे वैकर्त्तने किमत्रावशिष्यते।

सुग्री। उत्खातस्त्रिभुवनकण्टकोऽतिहृष्य
हृद्दिर्दग्धाञ्चितमहिमाप्ययं निकारः।
देव्याश्च प्रतिशमितस्तथाच सन्धा
निर्व्यूढा प्रगुणविभीषणाभिषेकात्॥

संप्रति तु द्रोणाद्रिं प्रत्याहरता हनूमतः सविशेषं गृहीतप्रवृत्तिर्दुर्मनायते किल कुमारभरतः तं प्रति वार्त्ताहरः प्रविसृज्यतां प्राभञ्जनिः। स्वयमप्यलंक्रियतां विमानराजः॥

रामः। यदभिरुचितं प्रियवयस्याय। इति तथा करोति।

सर्व्वे। विमानारोहणं नाटयन्ति।

सीता। अपवार्य्य लक्ष्मणं प्रति। अह्मेहिं सम्पदं कहिं पत्थीअदि।

लक्ष्म। देवि रघुकुलराजधानीमयोध्यां प्रति।

सीता। अवि समत्तो सो बणबासस्स अवही।

लक्ष्म। देवि अद्यतनमेव दिनं तत्।

सर्व्वे। विमानगतिं रूपयन्ति।

सीता। साद्भुतम्। अज्जउत्त एदे उण कदमा दूरादो अणिद्धारिदद्दक्खिणोद्देसा आबितथरिज्जंतसामलत्तणा परिसरा दीसन्ति।

रामः। देवि नैते भुवां परिसराः किन्तु
साक्षात् किलाष्टमूर्त्तेस्तस्यैषा मूर्त्तिरम्मयी प्रथमा।
गीतः सागर इति नृभिरपरिच्छेद्यात्मगाम्भीर्य्यः॥

सीता। जो अह्माणं जेट्ठससुरेहिं किदणिम्माणो त्ति बुडढपरं-

पराए सुणीअदि। एदस्स मज्झे बि किं एदं दूरप्पसारिदं धवलंसुअं बिअ अहिणबतिणच्छस्सासु भूमिसु दीसइ ॥

लक्ष्म। देवि

सोत्साहं धृतशासनैः सकुतुकैर्वनौकसां नायकैः
दिक्पर्य्यन्तधराधरेन्द्रशिखराण्यानाय्य निर्म्मापितः।
कल्पान्तावधिवन्दनीयमहिमा लोकस्य सेतुर्नवः
कीर्त्तिस्तम्भ इवायमार्य्यचरितस्याम्भोनिधौ लक्ष्यते ॥

रामः। अङ्गुल्या निर्दिशन्। वत्स

एता भुवः परिचिनोषि मिलत्तमाल—
च्छायान्धकारिततुषारनिकुञ्जपुञ्जाः।
उन्मूर्च्छदच्छमलयाचलतुङ्गशृङ्ग
प्राग्भारनिष्पतितनिर्झरपूरभाजः ॥

लक्ष्म। आर्य्य ता एवैताः। नातिदूर एव तावदासां स जीर्णकन्दरः।

गर्ज्जाजर्ज्जरितासु दिक्षु बधिरे तत्स्फूर्ज्जथुस्फूर्ज्जिते
व्योम्नि भ्राम्यति दुष्प्रभञ्जनजवादभ्रेऽप्यदभ्रे मुहुः।
आक्षिप्यान्धयति द्रुमान्धतमसे चक्षुः प्रविश्य क्षपा
यत्रासीत् क्षपिता क्षरज्जलधरे त्वक्सारलक्षीकृते ॥

सीता। स्वगतम्। अहो पमादो कहं मह मन्दभाइणीए दुट्ठदेव्वेहिं एदे बि महाणुहाबा ईरिसं अबत्थन्तरं अनुहाबिदा।

विभी। देव रामभद्र दृश्यन्ते किलैताः कावेरीतीरभूमयः।

यत्पर्य्यन्तमहीध्रसीम्नि कुहलीमाध्वीकधारोल्लिर—
हृष्यत्पूगवनीघनीकृततलैः स्तुङ्गैर्ज्जरच्छाखिभिः।
लक्ष्यन्ते विविधाश्रमाः स्थिरतपःस्वाध्यायसाक्षात्कृत—
ब्रह्माणो निवसन्ति यत्र मुनयः कल्पस्थितेः साक्षिणः ॥

यतो नातिदूर एव किलावाच्यां लोपामुद्रापरिष्कृतपरिसरे दीप्यति कौम्भसम्भवं ज्योतिः ॥

रामः। कथमतिक्रान्तमागस्त्यमाश्रमपदम्।

अयं वारां राशिः किल मकरभूद्यद्विलसिते-
रयं विन्ध्यो येनाहृतविहृतिराध्मानमजहात्।
विलिल्ये यत्कुक्षिस्थितशिखिनि वातापिवपुषा
स कासां वाणीनां मुनिरकलितात्मास्तु विषयः॥

तदप्रमेयविभवा विश्रान्तरात्मसाक्षिणस्ते महात्मानः कुतश्च नाभिवन्द्याः।

सर्व्वे। तथा कुर्व्वन्ति॥

॥ आकाशे ॥

सानुजस्त्वं प्रजाः शाधि कल्पान्तस्थायि ते यशः।
नामापि राम गृणतामम्टतत्वाय कल्पताम्॥

रामः। आकर्ण्य। कथमशरीरिण्या गिरा परमनुगृहीतो महामुनिवन्दारुः॥

॥ इतरे अभिनन्दन्ति ॥

विभी। देव रामभद्र एतास्ताः पम्पापर्य्यन्तभूमयः यासु बह्वोः कालादनुभूयमानान्यप्यभिज्ञानानि बलाच्चक्षुराकर्षन्ति।

॥ तथाहि ॥

बाणेनैकेन विद्धं विलसति पुरतस्तज्जरत्तालखण्डं
सोऽपि क्रीड़ाकपित्वं क्षणमिथुनिवहैरन्वभूदत्र वाली।
सौमित्रिः पादघातादिह हि सकुतुकं प्राक्षिपत् कूटमस्थ्नां
काबन्धं दृष्टमस्मिन्हनुमति भवतैवोत्तरीयं च देव्याः॥

सीता। स्वगतम्। किं णाम मह उत्तरीअं अज्जउत्तेण हणुमन्तस्स हत्थे दिट्ठं।

रामः। सस्मरणम्। हे देवि तदा किल वैक्लव्यादपह्रियमाणाया भवत्याः प्रभ्रष्टमनसूयानामाङ्कमुत्तरीयमस्माभिः प्रथममभिज्ञानमासादितम्।

हृष्टोः शरच्छीतकरप्रकाशः
कायेऽपि कर्पूरपरागपूरः ।
स्रान्तेऽपि सान्द्रामृतकुम्भसेक
स्तदा यदासीत् किल दृष्टमाचम् ॥

॥ सीता लज्जां नाटयति ॥

लक्ष्म । अयम्
तातस्य मित्रं किल गृध्रराज
स्तं पापमस्मिन् सहसानुबध्नन् ।
गात्रं जराजर्ज्जरितं विहाय
यशःशरीरं नवमाललम्बे ॥

सीता । स्वगतम् । कहं मह कारणादो तारिसाणं बि महानुहा-
बाणं ईरिसो अबत्थाबिसेसो णिसामीअदि ।

सुग्री । देव अतिक्रम्यन्ते किलैता दण्डकासीमानः ।
यत्र तेऽपि स्वसुः कर्णनासौष्ठविच्छित्तीषया ।
सानुप्लवाः क्वापि यातास्त्रिमूर्द्धखरदूषणाः ॥

सीता । वेपमाना । अह्मो कहं पुणोबि जेब्ब रक्खसा सुणीअन्ति ।

रामः । देवि अलं शङ्कया अभिधानमात्रमवशिष्यते ।
शरासनस्य टङ्कारात्सौमित्रेः केवलं किल ।
रक्षसां प्रलयः सिंहगर्ज्जनाद्दन्तिनां यथा ॥

निरूप्य । किमन्यादृशीव गतिरस्य विमानराजस्य ।

विभी । देवात्युच्चैः किलायं सह्यः सानुमान् एनमतिक्रम्य गम्यते
किलार्य्यावर्त्तः । तदतिक्रमणायेदमपि मध्यमलोकसान्निध्यं
किञ्चिदुज्झति ।

लक्ष्म । द्रष्टव्यः किलोत्तमपुरुषपदलाञ्छितो मध्यमलोकः ॥

॥ सर्व्वे उच्चैर्गतिवेगं निरूपयन्ति ॥

---

रामः । निरूप्य सविस्मयम् ।

यः पूर्व्वेषां नः कुलस्य प्रतिष्ठा
देवः साक्षादेष धाम्नां निधानम्।
त्रय्याः सारः कोऽपि मूर्त्तो विवस्वान्
प्रत्यासन्नः पुष्पकारोहणेन ॥

॥ सर्व्वे कापोतकेन (१) प्रणमन्ति ॥

सीता। उच्चैर्निरूप्य। अह्मो कहं दिणम्मि बि तारआचक्कं बिअ एदं दीसदि।

रामः। देवि तारकाचक्रमेवैतत् अतिविप्रकर्षाद्रविकिरणप्रतिहतचक्षुर्भिर्न दृश्यते किल दिवसे स विमानारोहणादपास्तः।

सीता। सकुतुकम्। कहं गअणबाडिआए फुल्लाइं कुसुमाइं ब्ब दीसंदि।

रामः। समन्तादवलोक्य। कथमपरिच्छेद्यदिग्विभागमिव सम्प्रति जगत्। यतः।

संस्तूयन्ते विप्रकर्षात् भौमा नोपाधयः स्फुटम्।
आन्तरीक्षाः पुनरमी सर्व्वतः सदृशा इव ॥

सुग्री। देव भ्रातुः सौहार्द्देन विधेयीकृतो यदृच्छया दिगन्तेषु विचरन्नभ्युपपन्नवानस्मि। तथाहि।

उदयास्ताचलावेतौ यत्क्रोडे बाल्यवार्द्धके।
विस्रम्भाच्चन्द्रसूर्य्याभ्यामतीयेते विनिर्भयम् ॥

अवधत्तामितो देवः।

कैलासाञ्जनशैलावेतौ तुल्योन्नतत्वपरिणाहौ।
चन्दनमृगमदलेपं गमितौ क्षौण्या नु वक्षोजौ ॥

इतश्चायं काञ्चनाचलः। परतश्चायमभ्रङ्कषशिरःशिखरी गन्धमादनः। ततः परस्मादगम्या मादृशां भूमयः ॥

---

(१) कपोताकारेण बद्धाञ्जलिपुटेन।

रामः। परितो विलोक्य। ससंभ्रमाश्चर्य्यम्। कथमेकपद एव सर्व्वमहो चक्षुर्गोचरः। परिच्छेद्या च सर्गस्थितिः।

सीता। अह्मो एदं किं बि अदिट्ठपुब्वं असारिसं जेब्ब दीसइ ण माणुसो णाबि पसु।

रामः। देवि अश्वमुखं किन्नरमिथुनमेतत् प्रायेणैतासु भूमिष्वेवं-विधानामेव भूयसां प्रचारः।

विभी। कथं समुन्मुखमेवाभ्येति प्रायेणालकेश्वरादेशधारिणानेन भवितव्यम्।

॥ नेपथ्ये ॥

देव दिनकरकुलमणे रामभद्र भवन्तमेकपिङ्गाचलेश्वरनि-देशादुपश्लोकयितुं साकेतं प्रस्थितयोरावयोर्याचासुकृतप-रिणामादन्तराल एव चक्षुर्विषयोऽसि। तन्निदेशपारतन्त्र्य-मपि भूयसे गुणाय यत् पुराणस्यैव पुंसोऽभिव्यक्तिपर्य्यायनिष्ठं महः साक्षात् क्रियते। इति प्रदक्षिणीकृत्याभिवन्देते।

॥ सर्व्वे निरूपयन्ति ॥

पुनर्नेपथ्ये किन्नरः।

आपन्नवत्सल जगज्जनतैकबन्धो
विद्वन्मरालकमलाकर रामचन्द्र।
जन्मादिकर्म्मविधुरैः सुमनस्त्वकोरै
राचम्यतां तव यशः शरदां सहस्रम्॥

॥ तत्रैव किन्नरी ॥

यावत् फणीन्द्रशिरसि क्षितिचक्रमेतत्
यावत् पुनर्ग्रहगणैः शवलं विहायः।
वैदेहि तावदमलो भुवनेषु पुण्यः
श्लोकः प्रशस्तचरितैरुपगीयतां ते॥

॥ दम्पती मन्दाक्षं नाटयतः ॥

इतरे। प्रियं नः प्रियम् ॥

रामः। लङ्केश्वर चिरसञ्चरणादत्र नानुरोधं तर्कये। तदद्य-
मितो मध्यमलोकसान्निध्येन गन्तुम् ॥

विभी। देव

एते ते सुरसिन्धुधौतदृषदः कर्पूरखण्डोज्ज्वलाः
पादा जर्जरभूर्जवल्कलभृतो गौरीगुरोः पावनाः।
तत्त्वालोकनिरस्तमोहतमसामध्यात्मविद्याजुषां
यत्र ब्रह्मविदां निसर्गमधुरं जागर्ति सौम्यं महः ॥

लक्ष्म। आर्य्य कथमेते भुवां परिसराः संस्तुतपूर्वान्यविषयग्रा-
हित्वं न क्षमन्ते चक्षुषः ॥

रामः। निरूप्य। ससंभ्रमावेगम्। वत्स ता एता गुरूणां कौशि-
कपादानां सञ्चरणेन पविचितपर्य्यन्तास्तपोवनभूमयः। यत्र तु
तत्रभवता याज्ञवल्क्यान्तेवासिना द्वितीयेन विदेहाधिपतिना
सह तत्संलापाम्तप्रमोदमनुभवतां गुरूणां लालनीयाभ्या-
मावाभ्यां बाल्योचितमुज्ज्वलितम् ॥

सीता। स्वगतम्। कहं कणिट्ठतादो त्ति गुणीअदि। इति परितः
सस्पृहमालोकयते।

रामः। लङ्केश्वर नोचितमिदानीं गुरुचरणपङ्कजपविचितेषु परि-
सरेषु विमानाधिरोहणम्।

॥ नेपथ्ये ॥

भो भोः रामलक्ष्मणौ। स भगवान् कृशाश्वान्तेवासी वां
समाज्ञापयति।

उभौ। विमानाधिदेवतामिङ्गितेन स्तम्भाय नियुज्य। अवहितौ स्वः।

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000120

॥ पुनर्नेपथ्ये ॥

पुरीं यथा स्थितौ यातं विलम्बेथां च मान्तरा ।
अरुन्धतीसहचरं ज्योतिर्वां संप्रतीक्ष्यते ॥

अहमपि तृतीयकालक्रियानुसन्धानपरवान् मूहूर्त्तद्वयेनागतएव ।

उभौ । यथाज्ञापयन्ति गुरवः । पुनर्विमानं प्रतिष्ठेते ।

रामः । अहो महात्मानोऽपि वात्सल्यपरतन्त्राः यन्महिम्ना तपःस्वाध्याययोर्लवशो विभक्ते समये तत्राप्यागमनमनुरुध्यन्ते । अथवा युक्तमेवैतत् । यतः करुणापारतन्त्र्येण मृदुस्वभावास्ते तपोवनतरुषु तरुषु च किं मनुष्येषु । विशेषतस्तु

राज्ञां मार्त्तण्डवंश्यानां गृहे नौ जन्म केवलम् ।
शास्त्रास्त्रज्ञानमुख्यस्तु संस्कारोऽस्मान्महात्मनः ॥

विभी । विलोक्य । किमिदमकाण्ड एव नीहारजालैरिव
क्ष्मारजोभिराच्छाद्यन्ते ककुभः ।

सर्व्वे । सविस्मयं पश्यन्ति ।

रामः । सवितर्कम् । मन्ये प्राभञ्जनेरस्मत्प्रवृत्तिमुपलभ्य मां प्रत्युपयातीह ससैन्यो भरतः ।

॥ प्रविश्य हनूमान् ॥

सपादपङ्कजस्पर्शं प्रणम्य । देव
स्थितो ध्यायन्नन्तः किमपि चरितं स्वेन भवत—
श्चिरं वार्त्तामिनामथ मदुपलभ्य प्रचलितः ।
जटी चीरी रामेत्यमृतविभवन्नाम रसयन्
मुहुर्हर्षोद्भ्रान्तप्रकृतिसहितोऽभ्येति भरतः ॥

रामः । सोल्लासम् । अहो चिरायायुष्मत्सौहार्दमुपलभामह इति सर्वानान्दानामुपरि वर्त्तामहे ।

लक्ष्म। सौत्सुक्यम्। सखे मारुते कुत्रार्य्यः।

हनू। य एते सैन्यस्य पुरतः पञ्चषास्तन्मध्ये पुरःसरः सानुजः स महात्मा भरतः।

लक्ष्म। निर्वर्णयति।

सीता। निरूप्य। कहं अम्हारिसो जेव्व दीसइ।

विभी। हंहो विमानराज चिराय बन्धुजनदर्शनालिङ्गनसंभावनादिना मिथोऽङ्गप्रमोदमनुभवन्त्वेते महानुभावास्तत्क्षणं विरम।

सर्व्वे। विमानावतरणं नाटयन्ति।

ततः प्रविशतः कतिचनप्रधानपुरुषपरिवृतौ भरतशत्रुघ्नौ॥

रामः। सरभसं पादपतितं भरतमुत्थाप्य एह्येहि वत्स

अनुभावयति ब्रह्मानन्दसाक्षात्क्रियामिव।
स्पर्शस्तेऽद्य वराम्भोजप्रस्फुरन्नालकर्कशः॥

॥ इति निर्भरमालिङ्ग्य विसृजति॥

लक्ष्म। सपादपतनं भरतमालिङ्गति।

शत्रुघ्नः। रामलक्ष्मणावभिवादयते।

उभौ। कुलस्थितिमनुवर्त्तस्व।

भरत शत्रुघ्नौ। दण्डवत् सीतां प्रणमतः।

सीता। कुमारा जेट्ठाणं भादुआणं अभिमदा होह।

रामः। वत्सौ भरतशत्रुघ्नौ

अस्माकं व्यसनाम्भोधावयं पोतत्वमागतः।
कपीन्द्रोऽयं च लङ्केन्द्रो मित्रं धर्म्महिते रतः॥

तत् परिष्वजतम् इति सुग्रीवविभीषणौ दर्शयति।

भरतशत्रुघ्नौ। तौ परिष्वज्य यथोचितमुपचरतः॥

भर। आर्य्य कुलगुरुर्नो भगवान्मैत्रावरुणिः सिंहासनगृहे सम्पादितसकलाभिषेकसम्भारो भवन्तं प्रतीक्षते। यथाज्ञापयत्यार्य्यः।

रामः। स्वगतम्। कौशिकपादाः प्रतीक्षणीयाः स च भगवान्मैत्रावरुणिरेवमाज्ञापयति। भवतु समयोचितं प्रतिकरिष्यते। प्रकाशम्। यथाज्ञापयति कुलगुरुः।

सर्व्वे। परिक्रामन्ति।

ततः प्रविशति वसिष्ठो दशरथकलत्रैरुपचर्य्यमाणा अरुन्धती च।

वसि। स्वगतम्।

क्षमायाः स क्षेत्रं गुणमणिगणानामपि खनिः
प्रपन्नानां मूर्त्तः सुकृतपरिपाको जनिमताम्।
कृपारामो रामो वहिरिह दृशोपास्यत इति
प्रमोदाद्वैतस्याप्युपरि परिवर्त्तामह इमे॥

भवतु तथापि लोकयात्रानुवर्त्तनीया। प्रकाशम्। वध्वौ कौशल्यासुमित्रे।

उभे। आणवेदु कुलगुरू।

वसि। दिष्ट्याक्षतप्रतिनिवृत्तवत्से स्थः।

उभे। तुम्हाणं आसिसाणं पहावो।

अरु। कैकेयीं विलोक्य। वत्से कैकेयि किमेवमतिदुर्मनायसे।

कैके। अम्ब मह मन्दभाइणीए अधण्णदाए सअलो बि लोओ एव्वं कोलीणं भणदि जं बच्छाणं पव्वासजणणी मज्झमजणणी मन्थरामुहे आसि। ता कहं बच्छाणं मए मुहं पेक्खिदव्वं।

अरु। वत्से अलं वृथा कौलीनशङ्कया। आर्य्यमिश्रैरयमर्थस्तदैवान्तरेण चक्षुषा साक्षात्कृतः।

सर्व्वाः। कहं बिअ।

अरु। मन्थरारूपधारिण्या शूर्पणख्या माल्यवद्वचनादेतद्विहितमिति।

सर्व्वाः। अहो रक्खसाणं दुट्टताभिओओ जो इध द्विदं अबलाजणं बि बाधेदि।

वसि। ॐ मङ्गलसमये ऽलमलं यत्किञ्चिद्दुःखकैः का पुनरद्यापि राक्षसाभियोगवार्त्ता।

रामः। वसिष्ठं विलोक्य। सोल्लासम्। स एष भगवान्मैत्रावरुणिः।

यद्दर्शनात् किमप्येवं द्रवीभवति मे मनः।
राकासुधाकरालोकादिन्दुकान्तोपलो यथा॥

लक्ष्मणं प्रति। वत्स इत इतः।

उभौ। उपसृत्य। भगवन्कुलगुरो रामलक्ष्मणावभिवादयेते।

वसि। चक्षुष्मां स्वस्वसमये संस्कारत्वं समाप्नुताम्।
वत्सौ नयेन धर्म्मेण ज्ञानेन च पुरस्कृतम्॥

॥ उभावरुन्धतीमभिवन्देते ॥

अरु। दृष्टैर्युज्येथाम्।

उभौ। क्रमेण सर्व्वा मातॄरभिवन्देते॥

सर्व्वाः। तौ निर्भरं परिष्वज्य मूर्ध्न्युपाघ्राय। जं अह्मो चिन्तेमो तं तुह्माणं होदु।

सीता। उपसृत्य वसिष्ठं प्रणमति॥

वसि। वत्से वीरप्रसविनी भव।

सीता। अरुन्धतीं प्रणमति।

अरु। सीतां निर्भरमालिङ्ग्य।

लोपामुद्रानसूयाहमिति चिरस्त्वया सह।
पतिव्रताश्चतस्रोऽत्र सन्तु जानकि साम्प्रतम्॥

सीता। श्वश्रूरभिवन्दते।

सर्व्वाः। जादे कुलपडिट्ठाबअदारअप्पसविणी होहि।

॥ नेपथ्ये ॥

प्रवर्त्तन्तां पौराः प्रतिसदनमद्योत्सवविधौ
चिरं स्वे स्वे कर्म्मण्यथ समबधत्ताप्यधिकृताः।

यथोक्तं सम्भारं पुनरिह विधत्त द्विजवराः
कृशाश्वान्तेवासी कुशिकपतिराज्ञापयति वः ॥

वसि। आकर्ण्य। अहो अयं भाग्यमहिमा वत्सस्य यद् भगवान् कौशिकः स्वयं सिंहासने समभिषेक्तुं संप्राप्तः।

इतरे। प्रियं नः प्रियम्।

॥ ततः प्रविशति सशिष्यो विश्वामित्रः ॥

विश्वा।

सत्रप्रत्यूहशान्त्यै दशरथकरतः कर्षितेनं मया यद्—
यत् स्वान्ते संविमृष्टं तदनुगुणविधौ यच्च वैयग्र्यमासीत्।
तद्दैवस्यानुगुण्यात् प्रयतनविभवैश्चाद्य राज्येऽभिषिच्य
श्रीरामं निर्वृतानां फलितमिति मुहुः संप्रमोदामहे नः॥

॥ इति परिक्रामति ॥

वसि। स एष कौशिकः।

क्षात्रं प्राकृतिकं तेजो ब्राह्मं यस्य विशिष्यते।
लोकोत्तरचमत्कारनिधेस्तस्याद्भुतं न किम् ॥

॥ वसिष्ठविश्वामित्रावुपसृत्यान्योन्यमुपचरतः ॥

विश्वा। भगवन्मैत्रावरुणे किमद्यापि प्रतीक्ष्यते।

वसि। यथोचितमाद्रियताम्।

विश्वा। दिव्यर्षिगणमुद्दिश्य। निर्वर्त्यतां रामभद्रस्याभिषेकः।

इतरे। यथोचितमाचरन्ति ॥

॥ नेपथ्ये दुन्दुभिध्वनिः ॥

सर्वे। सविस्मयं पुष्पवृष्टिं रूपयन्ति।

वसि। कथं सलोकपालो भगवान् पाकशासनो रामभद्रस्याभिषेकमनुमोदते।

कृताभिषेकमङ्गलो रामः। वशिष्ठविश्वामित्रावुपसृत्य। गुरू अभिवादये।

उभौ। रामभद्र गुणाराम भ्रातृभिस्त्वं पुरस्कृतः।
ईक्ष्वाकुमुख्यैर्भूपालैश्चिरमूढां धुरं वह।

इतरे। तथास्तु इत्यनुमोदन्ते।

विश्वा। वत्स रामभद्र।

रामः। आज्ञापयन्तु गुरवः।

विश्वा। विसृज्येतामेतावनुभूतोत्सवप्रमोदौ सुग्रीवविभीषणौ पुष्पकं च संकल्पसमयसुलभं राजराजमेवाश्रयताम्।

रामः। तथा करोति।

विश्वा। वत्स रामभद्र

निर्व्यूढं गुरुशासनं गुरुतरं धर्मोऽपि संरक्षितो
रक्षःसंहरणाच्चिकित्सितमनोरोगा त्रिलोकी कृता।
सिद्धार्थाश्च सुराः सहानुजसुहृद्द्वारेण राज्यं पुन
र्लब्धं किं करणीयमेतदधिकं श्रेयस्तदप्युच्यताम्॥

रामः। इतोऽधिकमपि श्रेयोऽस्ति। तथापीदमस्तु भगवत्पाद प्रसादात्।

क्ष्मापालाः क्षीणतन्द्राः क्षितिवलयमिदं पान्तु ते कालवर्षा
वार्वाहाः सन्तु राष्ट्रं पुनरखिलमपास्तेति सम्पन्नशस्यम्।
लोके नित्यप्रमोदं विदधतु कवयः श्लोकमाप्तप्रसादं
संख्यावन्तोऽपि भूम्ना परकृतिषु मुदं संप्रधार्य्य प्रयान्तु॥

विश्वा। एवमस्तु।

॥ निष्क्रान्ताः सर्व्वे ॥

## इति सप्तमोऽङ्कः।

॥ समाप्तमिदं महावीरचरितं नाम नाटकम्॥

अदोविश्वप्रकाशेन यन्त्रेण मुद्रितं शके।
ग्रहवाहाद्रिविधुमे श्रीतारानाथसंस्कृतम्॥

---

## ॥ शुद्धिपत्रम् ॥

| अशुद्धम्। | शुद्धम्। | पृष्ठादि |
|---|---|---|
| भारती | ऽथात्स्त्री | २।२५ |
| आणवेदि | आणबेदि | ४।८ |
| देशविशेष | पुरविशेष | ४।१८ |
| स्रुवा | स्रुचा | ८।२५ |
| तामिस्र | तामिस्त्र | ६।४ |
| अणुभावा | अणुभाबा | ६।८ |
| एव्वं | एब्बं | १०।१४ |
| एव्व | एब्ब | १२।७ |
| वादाली | बादाली | १२।१८ |
| विस्र | बिस्र | १२।१९ |
| भावं | भाबं | १२।१९ |
| ह्वड्ड | ह्बड्ड | १२।१९ |
| एव्व | एब्ब | १२।२१ |
| विज्जु | बिज्जु | १४।७ |
| विस्र | बिस्र | १४।७ |
| पह्राव | पह्राब | १४।८ |
| वलं | बलं | १४।२४ |
| देव | देब | १५।८ |
| अवि | अबि | १६।१७ |
| एव्वंभवे | एब्बभबे | १६।१७ |
| वड्ढामो | बड्ढामो | १६।१९ |
| एस्थ | एत्थ | १९।२ |
| सिलिटड्ड | सिलिब्भड्ड | २२।३ |
| पति | पतिः | २३।१४ |
| वभूबु | वभूवु | ३७।९ |
| बिमुक्तिं | विमुक्तिं | ३७।२६ |
| किंन् | किं | ३९।२१ |
| मह्रा | मह्रान् | ३९।२१ |

## ॥ शुद्धिपत्रम् ॥

| | | |
|---|---|---|
| भिह्व | भिह्व | ४२।५ |
| स्त्रजाति | स्वजाति | ४५।१७ |
| खरादि् | रावणादि | ५०।२४ |
| शरभङ्गे न | शरभङ्गे ण | ६२।४ |
| मंचिप्त | संचिप्त | ६७।१६ |
| क्रपम्य | क्रम्य | ६८।२२ |
| वोध | बोध | ७३।१२ |
| निवन्धना | निबन्धना | ७४।२ |
| विषम | विषय | ७७।१४ |
| कथवति | कथयति | ८०।४ |
| प्रतिशति | प्रविशति | ८३।१ |
| र्म्भि | र्म्भिः | ८५।११ |
| ज्जेव | ज्जेब | ८५।१७ |
| ज्जेव | ० | ८६।१ |
| प्रवल | प्रबल | ९०।२७ |
| शिशेष | विशेष | १००।७ |
| किमेबं | किमेवं | १०३।२१ |
| रङ्कस्य | वङ्कस्य | १०५।२३ |
| देब्या | देव्या | १०६।८ |
| अम्ब | अन्व | १०८।१९ |
| एब | एव | १११।१ |
| भबि | भवि | १११।८ |
| र्वर्णयति | र्वर्णयति | ११४।४ |
| बतरणं | वतरणं | ११४।८ |
| रेब | रेव | ११५।२ |
| बत्से | वत्से | ११५।१० |
| प्यसविणी | प्यसबिणी | ११६।२२ |
| अबधत्त | अवधत्त | ११६।२५ |
| बिधत्त | विधत्त | ११७।१ |

———

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000129

Eb 2367

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000131

ULB Halle 3/1
001 504 673

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000132

। महावीरचरितम् ।

॥ महाकवि श्रीभवभूतिप्रणीतम् ॥

गवर्णमेण्ट संस्कृतपाठशालाध्यापक

श्रीतारानाथ तर्कवाचस्पति

संस्कृतम् ॥

॥ विश्वप्रकाशयन्त्रे मुद्रितम् ॥

संवत् १९१४ ।

# MAHÁ VÍRA CHARITA,

BY

BHAVABHÚTI.

EDITED

BY

PUNDIT TARANATH TARKAVACHASPATI.

*CALCUTTA :*

Printed AND Published.

BY

HERUMBO CHUNDER BANERJEE & Co.

AT

BISHWAPROKAS PRESS TAMER'S LANE No 5.

*Price One Rupee Eight Annas.*

1857.

Universitäts- und Landesbibliothek Sachsen-Anhalt
urn:nbn:de:gbv:3:5-89745/fragment/page=00000133